LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH, 11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	Rs. 1
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14
Aitereya Lochana.	2
Amarkosha, Fasc. 1	2
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each	2
Anumana Didhiti Prasarini, Fasc. 1 @ /10/-	1
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3
Atmatattaviveka, Fasc. I	0
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-10; Vol. II, Fasc. 1-10 @ 1/ each	20
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol II, Fasc. 1 @ /10/ each	1
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc 1-5 @ /10/ each ...	5
Bhāsavritty	0
Bhāṭṭa Dipikā Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1, @ /10 each ...	4
Bauddhastotrasangraha	2
Bṛhaddēvatā Fasc. 1-4 @ /10/ each	2
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each	3
Bodhicaryāvatāra of Çāntideva, Fasc. 1-6 @ /10/ each	3
Çri Cantinatha Charita, Fasc. 1-3	1
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. V, Fasc. 1-4 @ /10/ each	14
Ditto Vol. VI, Fasc. 1-3 @ /10/ each	3
Ditto Vol. VII, Fasc. 1-3 @ 1/4/ each	3
Ditto Vol. VIII, Fasc. 1-5 @ /10/	3
Ditto Vol. IX, Fasc. 1-2	1
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-17 @ /10/ each	10
Caturvarga Chintāmani, Vol. II, Fasc. 1-25; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10; Vol. IV. Fasc. 1-6 @ /10/ each ...	36
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each	2
Ditto Vol. IV, Fasc. 9-10 @ /10/	1
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each	8
*Çrauta Sūtra of Çankhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4; Vol 4, Fasc. 1 @ /10/ each	10
Çri Bhāshyam, Fasc. 1-3 @ /10/ each	1
Dāna Kriyā Kaumudi, Fasc. 1-2 @ /10/ each	1
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each ...	3
Gobhiliya Grihya Sutra, Vol. I. @ /10/ each	3
Ditto Vol. II. Fasc. 1-2 @ 1/4/ each	2
Ditto (Appendix) Gobhila Parisista	2
Ditto Grihya Sangraha	0
Haralata	1
Karmapradipā, Fasc. I	1
Kāla Viveka, Fasc. 1-7 @ /10/ each	4
Kātantra, Fasc. 1-6 @ /12/ each	4
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each	5
Kiranavali, Fasc. 1-2 @ /10/ each	1
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each	19
Ditto Vol. IV, fasc. 1 @ 1/4	2
Manutīkā Sangraha, Fasc. 1-3 @ /10/ each	1
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each	9
*Mimāmsā Darçana, Fasc. 10-19 @ /10/ each	6
*Mugdhabodha Vyakarana, Fasc. 1-4 @ /10/ each	2

तृणोलुपं स्त्रीकुमारं दासीदासं कुटीकुटम्।
भागवतीभागवतं दर्भात्तु शरपूतिकम्॥
कुब्जाद्वामनकैरातमुष्ट्रात् खरशशौ तथा।
मांसात्तु शोणितं शाट्याः पिच्चटं पुरुषोऽर्ज्जुनात्।
शकृत्पुरीषं मूत्राच्च शेषं ज्ञेयं प्रयोगतः॥

गवाश्वमित्यादि निर्द्देशात् गोऽश्वं गोऽश्वौ इत्यादौ पशुत्वाद्विकल्पः। इह केषाञ्चिद्विकल्पे प्राप्ते, दासीदासानाम् एकशेषनिरासार्थः, केषाञ्चिदप्राप्ते पाठः। श्वचाण्डालमित्यस्य नित्यविरोधित्वात् सिद्धे अविरोधार्थः पाठः। दर्भशरं, दर्भपूतिकं, कुब्जवामनं, कुब्जकैरातम्, उष्ट्रखरम्, उष्ट्रशशं, मांसशोणितं, शाटीपिच्चटं, अर्ज्जुनपुरुषं, मूत्रशकृत्, मूत्रपुरीषमिति। आकृतिगणोऽयम्।

पक्षि-वृक्ष-मृग-पशु-धान्य-तृण-व्यञ्जनानां वा। पक्ष्यादिवाचिनां चे ऐक्यं स्याद्वा। हंसचक्रवाकं,धवखदिरपलाशं,रुरुपृषतं, गोमहिषं, व्रीहियवं, कुशकाशं, दधिघृतम्। येषामव्यान्तानां दधिपयआदौ पाठस्तेषां व्यान्तानामेव वैक्यम्, पक्षे हंसचक्रवाका इत्यादि। मृगाणां पशुत्वेनैव सिद्धे पृथक् ग्रहणात् मृगवाचिनां पश्वन्तरवाचिना सह चे ऐक्यं न स्यात्, तेन रुरुमहिषा इत्यादि। अत्राप्राणिजातीनां नित्ये प्राप्ते विकल्पार्थः पाठः। येषां सर्व्वौ हि द्वन्द्वो विभाषयैकवद्भवतीति न्यायात् विकल्पः सिद्धः, तेषां पाठो व्यतिकरनिरासार्थः (१)। तथाच "हनूमन् कीदृशं सख्यं नरवानररक्षसा"मिति भट्टिः।

(१) विरुद्धसम्पर्काणामितरेतर एव न समाहार इत्यर्थः।

विरुद्धद्रव्याणाम्। सहानवस्थितानां अद्रव्यवाचिनां च ऐक्यं स्यात्। शीतोष्णं शीतोष्णे, जन्ममरणं जन्ममरणे। विरुद्धेति किं? कामक्रोधौ। अद्रव्येति किं? स्वर्गनरकौ, शीतोष्णे उदके (१)।

अश्ववडवा-पूर्व्वापराधरोत्तराणाम्। एषां च ऐक्यं वा स्यात्। अश्वशब्देनैव पाठात् अश्ववडवे इत्यत्र न स्यात्। अश्ववडवं, पूर्व्वापरम्, अधरोत्तरम्। पक्षे अश्ववडवौ इत्यादि।

न सेनाङ्ग-फल-क्षुद्रजन्तु-पक्षि-वृक्ष-मृग-धान्य-तृणानामत्वान्तानाम्। अत्वान्तानामेषां च ऐक्यं न स्यात्। रथिकाश्वारोहौ बदरामलके, यूकालिक्षे, हंसचक्रवाकौ, प्लक्षन्यग्रोधौ, रुरुपृषतौ, व्रीहियवौ, कुशकाशौ।

दधिपय-आदीनाम्। अत्वान्तानां दधिपय-आदीनां च ऐक्यं न स्यात्।

दधिपय-आदिर्यथा—

दधिपयसी ऋक्सामे, स्कन्दविशाखावाद्यवसाने च।
सर्पिर्मधुनी श्रद्धामेधे स्वर्गापवर्गौ च॥
ब्रह्मप्रजापती मेधातपसी हरिकौशिकौ।
अपवर्गोपनिषदौ परिव्राजककौशिकौ॥
शिववैश्रवणाविध्माबर्हिषी दधिसर्पिषी।

---

(१) अत्र शीतोष्णशब्दयोरुदकविशेषणत्वात् द्रव्यवाचित्वमिति।

शुक्लकृष्णौ तथा वाङ्मनसे अध्ययनात्तपः।
उदूखलात्तु मुषलं प्रोक्ता अत्रोनविंशतिः (१)॥

इह केषाञ्चिद्विकल्पे केषाञ्चिन्नित्ये प्राप्ते ऐक्यनिषेधः। अध्ययनात्तप इत्यादि—अध्ययनतपसी, उदूखलमुषले, इध्माबर्हिषी इति गणपाठात् घं इति।

चावयवानामियत्तायां, वा तु सामीप्ये। चसावयवीभूतानां दानामियत्तायां गम्यमानायां प्राप्तमैक्यं न स्यात्, ससामीप्यायामियत्तायां तु वा (२)। दश दन्तौष्ठाः, सप्त मार्दङ्गिकपाणविकाः(३) उपदशा(४) दन्तौष्ठाः उपदशं दन्तौष्ठम्। उपदशा इति ह्व-सः, समीपिप्राधान्यात् ब्वम्। उपदशमिति व-सः, सामीप्यप्राधान्यात् क्वम्।

इदं प्रकरणं (५) नियमार्थं, प्राण्यङ्गादीनां (६) समाहार-च एव, दधिपय-आदीनामितरेतर-च एव, अन्येषां विकल्पार्थं एवेति।

---

(१) एषु विशाखः कार्त्तिकेयः। कौषिकः इन्द्रः। शैखिकः शिखावान्। वैश्रवणः कुवेरः। इध्मं इन्धनम्। वर्हिः कुशः इति।

(२) इयत्ता संख्या सीमा चेत्यर्थः। सामीप्येन सह वर्त्तमाना या इयत्ता तस्यां गम्यमानायां वा स्यात्।

(३) उभयत्र प्राणितूर्य्यसेनाङ्गानामित्यनेन प्राप्तमैक्यं निषिद्धम्।

(४) दशानां समीपे ये ते उपदशाः, नव एकादश वा इत्यर्थः।

(५) द्वन्द्वैकवद्भावप्रकरणमित्यर्थः।

(६) नियमप्रकारमाह प्राण्यङ्गादीनामिति।

३२५। ऊर्व्वष्ठीवपदष्ठीवं धेन्वनडुहावहोरात्रः स्त्रीपुंसौ वाङ्मनसे ऋक्सामे दारगवाक्षिभ्रुवादयः। साध्या (१)।

इति चः।

३२५। ऊर्व्व। ऊरू च अष्ठीवन्तौ च तत्। पादौ च अष्ठीवन्तौ (२) च तत्। धेनुश्च अनड्वांश्च तौ। अहश्च रात्रिश्च सः। स्त्री च पुमांश्च तौ। वाक् च मनश्च ते। ऋक् च साम च ते। दाराश्च गावश्च तत्। अक्षिणी च भ्रुवौ च तत् इति वाक्यम्। दृभेदः समाहारेतरेतराकारत्वज्ञापनार्थः। आदिना नक्तञ्च दिवा च नक्तंदिवं, द्वयोरधिकरणार्थत्वेनाधेयसापेक्षत्वादसामर्थ्येऽपि (३) सः। रात्रिश्च दिवा च रात्रिन्दिवम्, अहश्च दिवा च अहर्दिवं प्रतिदिनमित्यर्थः। ऋक् च यजुश्च ऋग्यजुषम्, उदूखलमुषलं, तण्डुलकिण्वं, चित्ररथवाह्लीकं, विष्वक्सेनार्ज्जुनौ चित्रास्वाती भार्य्यापती पुत्त्रपौत्रौ केशश्मश्रू विशेषणविशेष्ये, विशेष्यविशेषणे इत्यपि कश्चित्, स्नातकराजानौ प्रतिष्ठालिप्से शूद्राचार्य्यौ मर्य्यादाभिविधी गिरीजानू पाण्डुष्टतराष्ट्रौ। उदूखलादीनां मुषलादिभिः सह चे पूर्व्वनिपातः। एवं जाया च पतिश्च जम्पती

---

(१) निपात्या इत्यर्थः। (२) अष्ठीवान् जानु।

(३) नक्तं दिवा इत्युभयोः स्वभावेन रात्रौ दिने इत्यधिकरणवाचकत्वम्, ततश्च योऽधिकरणवाची सोऽवश्यमेवाधेयमपेक्षते इति सापेक्षत्वम्। तस्मात् सापेक्षमसमर्थं भवतीति न्यायात् समाससम्भावनाभावेऽपि निपातनात् समास इति पर्य्यवसितोऽर्थः।

दम्पती। जायाया जन्दम्वादेशौ वा। पक्षे जायापती। माता च पिता च मातरपितरौ। मातुर्मातरादेशो वा। पितुश्च पितर इति क्षपणकस्तन्मते मातरपितराभ्यां मातरपितरयोरिति। पक्षे मातापितरौ इत्यादिसंग्रहशेषं (१) शिष्टप्रयोगानुसारेण बोध्यम्। अहोरात्र इति निर्देशात् अहोरात्रादीनां पुंस्त्वमपि निपात्यते।

अहोरात्रादिर्यथा—

अहोरात्रादिषु प्रोक्ता रात्राह्नान्ता अहान्तकाः।
पुण्याह-सुदिनाहाभ्यां विना(२)र्द्धर्चादयस्तथा।
सूक्तवाकोऽनुवाकश्च शेषं ज्ञेयं प्रयोगतः॥

अहश्च रात्रिश्च अहोरात्रावपि इतरेतरयोगात्, तथाच अहोरात्राविमौ पुण्यौ इति। एवं पूर्व्वरात्रः, पूर्व्वाह्णः, अपराह्णः, द्व्यह्नः, त्र्यह्नः इत्यादि। पुण्याहसुदिनाहयोर्व्वर्ज्जनात् पुण्याहं, सुदिनाहम्। अर्द्धम् ऋचः अर्द्धर्चः, सरकः (३) इत्यादि। एषां पूर्व्वेण क्लीवत्वञ्च। अर्द्धर्चादेराकृतिगणत्वात् पुण्यरात्रं प्रियागमे इत्यादि। वचधोर्घञ् वाकः, अनुक्रान्तो वाकोऽनया अनेन कुलेन वा अनुवाकः, एवं सूक्तवाकः इत्यादि। एषां पाठसामर्थ्यात् च-स-भिन्नस्थेऽपि पुंस्त्वम् (४)।

(१) ऊर्व्वष्ठीवादिगणावशिष्टम्।

(२) पुण्याह-सुदिनाहाभ्यां विना अहान्तका इत्यर्थः।

(३) सरक ऐक्षवं मद्यम्।

(४) अतएव पूर्व्वोदाहरणे बहुव्रीहिणा स्त्रीक्लीवयोर्विशेषणत्वेऽपि पुंस्त्वं दर्शितमिति।

एकशेषप्रकरणम्।

पुंस्त्रियोस्त्यभिन्नयोः शिष्यो ना। त्यमात्रकृतभेदयोः पुंस्त्रियोः पुमान् शिष्यते। देवश्च देवी च देवौ। गौरयं गौरियम् इमौ गावौ इत्यत्र त्यकृतभेदाभावेऽपि अर्थकृतभेदात् स्यादेव। त्यभिन्नयोः किम्? हरगौर्य्यौ, इन्द्रेन्द्राण्यौ(१)। लिङ्गमात्रकृतभेदे विधानात् इन्द्राविति कश्चित्। तथाच—वरुणाविन्द्रौ भवौ सर्व्वौ मृडौ (२) इत्यादि।

गोत्रयूनोर्गोत्रम्। त्यभिन्नयोर्गोत्र-युव-त्यान्तयोर्गोत्रत्यान्तं शिष्यते (३)। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। गोत्रयूनोः किम्? गर्गगार्ग्यायणौ गर्गगार्ग्यौ। त्यभिन्नयोः किम्? गार्ग्यवात्स्यायनौ। भगवित्तस्यापत्यं भागवित्तिः गोत्रेऽदन्तात् ञिः। भगवित्तस्यापत्यं युवा, कुत्सा-सौवीरगोत्रात् ञिकः भागवित्तिकः (४)। भागवित्तिश्च भागवित्तिकश्च भागवित्तिभागवित्तिकौ इत्यत्र न स्यात्, त्यातिरिक्तकुत्सार्थकृतभेदात्। भागवित्ती इति कश्चित्।

स्त्री पुंवच्च। त्यभिन्नयोर्गोत्रयूनोर्गोत्रत्यान्ता स्त्री शिष्यते, स्त्रियाः पुंवद्भावश्च। गार्गी च गार्ग्यायणश्च गार्ग्यौ, गार्ग्यौ च

(१) पूर्व्वत्र प्रकृतिभेदात्, परत्र ईप्प्रत्यय-कृत-भेदेऽपि आनङादेशस्य प्रत्यय-भिन्नत्वात् तत्कृतभेदाच्च स्यादित्यर्थः।

(२) वरुणश्च वरुणानी च इत्याद्येकशेषः।

(३) त्यभिन्नयोः प्रत्ययमात्रकृतभेदयोः गोत्रार्थ-युवार्थकृत-तद्धितप्रत्ययान्तयोः। गोत्रयुवार्थयोर्भेदस्तु तद्धितपादस्य प्रथमसूत्रटीकायां द्रष्टव्यः।

(४) कुत्सार्थे सौवीरगोत्रात् ञिको भवतीति तद्धितपादे ञ्योदौत इति सूत्रस्य टीकायां वक्ष्यति। भागवित्तिको जाल्म इत्यर्थः।

गार्ग्यायणौ च गर्गाः (१) दाक्षी च (२) दाक्षायणश्च दाक्षी। त्यभिन्नयोः किम्? गार्गीवात्स्यायनौ।

क्लीबाक्लीबयोः क्लीबं वा तु कश्च। त्यभिन्नयोः क्लीबाक्लीबयोः क्लीबं शिष्यति तस्मात् कश्च वा। शुक्लश्च शुक्ला च शुक्लश्च शुक्लं, पक्षे शुक्लानि। त्यभिन्नयोः किम्? सितधवलशुक्लानि, हिमहिमान्यौ।

भ्रातृस्वस्रोः पुत्त्रदुहित्रोर्भ्रातृपुत्त्रौ। भ्रातृस्वस्रोर्भ्राता पुत्त्रदुहित्रोः पुत्त्रः शिष्यते। भ्राता च स्वसा च भ्रातरौ, पुत्त्रश्च दुहिता च पुत्त्रौ।

अतरुणानेकखुर-ग्राम्यपशुसंघेषु स्त्री। अतरुणानामनेकखुराणां ग्राम्यपशूनां सङ्घेषु स्त्री शिष्यते। इमे अजाश्च इमा अजाश्च इमा अजाः। इमे गावश्च इमा गावश्च इमा गावः। अतरुणेति किम्? इमा वत्साश्च इमे वत्साश्च इमे वत्साः, इमा वर्कर्य्यश्च इमे वर्कराश्च इमे वर्कराः (३)। अनेकखुरेति किम्? इमे अश्वाश्च इमा अश्वाश्च इमे अश्वाः। ग्राम्येति किम्? इमा रुरवश्च इमे रुरवश्च इमे रुरवः। सङ्घे किम्? गौश्चायं गौश्चेयम् इमौ गावौ।

त्यदाद्यन्ययोस्त्यदादिः। त्यदाद्यन्ययोस्त्यदादिः शिष्यते। स्यश्च चैत्रश्च त्यौ। स च मैत्रश्च तौ। यश्च विप्रश्च यौ। त्यदादीनां यत् परं तत् शिष्यते। स्यश्च स च तौ, स च यश्च यौ, यश्च एष

---

(१) अत्र बहुत्वे गर्गयस्कविदादीत्यनेन ष्यञ्र लुक्।

(२) दक्षस्यापत्यं दाक्षिस्तस्यापत्यं स्त्री दाक्षीति।

(३) वर्करस्तरुणः पशुरित्यमरः।

च एतौ, स च त्वञ्च युवां, स च त्वञ्च अहञ्च वयं, स च कश्च कौ। त्यदादिर्यथा—त्यद्तद्यद् इदम् अदस् एतद् एक द्वि युष्मदस्मद् भवत् किम् इति।

सरूपाणामेकक्तावेकः। तुल्यरूपाणामेकः शिष्यते एकस्यां क्तौ। वृक्षश्च वृक्षश्च वृक्षौ, वृक्षश्च वृक्षश्च वृक्षश्च वृक्षाः। गार्ग्यश्च गार्ग्यश्च गार्ग्यश्च गर्गाः। माषो व्रीहिः (१) माषो मूर्खः माषो माषक(२)स्ते माषाः। अक्षो विभीतकः (३) अक्षो रथावयवः अक्षः पाशकस्ते अक्षाः। पादाः रश्मङ्घ्रितुर्य्यांशा इत्यमरः। एषामर्थभेदेऽपि सारूप्यमेकानुपूर्व्वीकत्वात् (४)। इह सरूपाणां लीनामेकशेष इति मते तु वृक्ष वृक्ष औ, वृक्ष वृक्ष वृक्ष जस् इति स्थिते एकस्यामौ-आदिक्तावेकः शिष्यते अर्थादन्ये निवर्त्तन्ते। सरूपसमुदायात् कृतायामेकस्यां क्तौ परतः एकः सिद्धः शिष्टोऽर्थवान् समुदायमभिधत्ते।

यदुक्तम्—

सरूपसमुदायाद्धि विभक्तिर्या विधीयते।
एकस्तत्रार्थवान् सिद्धः समुदायार्थवाचकः॥ इति।

वृक्षश्च वृक्षश्च वृक्षावित्यादि बालव्युत्पत्तये क्यन्तेनार्थकथनं,

---

(१) माष्कड़ाइ इति भाषा। (२) गुञ्जापरिमाणविशेषः।

(३) बयेड़ागाछ इति भाषा।

(४) एका अभिन्ना आनुपूर्व्वी वर्णानुक्रमो येषां तेषां भावस्तत्त्वात्। अतएव अर्थभेदे हि नाम्नां समानरूपता विद्यत एवेत्युक्तं गोयीचन्द्रेण।

अत्रा(१)न्योन्यार्थानुप्रवेशात् एकत्वाभावात् द्वित्वे भवत एव न तु क्रमिति। यदुक्तम्।

सहभावविवक्षायां वृत्तिर्द्वन्द्वैकशेषयोः।
क्रमेणार्थप्रतीतौ हि न स्यात् द्विवचनादिकमिति (२)॥

त्यन्तानामेकशेष इति मते तु क्तिविभक्तिः। विभज्यते त्यर्थोऽनयेति विभक्तिः कारकं, तथाच एकस्मिन् कारके विवक्षिते सति सरूपाणामेकशेष इत्यर्थः। एवञ्च सर्व्वं (३) सिध्यति। किन्तु वृक्षयोर्वृक्षाणां वा पुष्पमित्यादावेकत्वेऽपि सरूपाणामेकशेषनिर्देशादेव स्यात् (४)।

---

(१) वृक्षश्च वृक्षश्च वृक्षावित्यादौ विभक्त्यन्तेनार्थकथनस्य बालव्युत्पत्तिप्रयोजनकत्वमनादृत्य यदि विभक्त्यन्तानामेवैकशेषः स्वीक्रियते तदा पूर्व्वपदलोपे एकवचनान्तमेवोत्तरपदं शिष्यते इति कथं न वक्तुं शक्यते इत्याशङ्क्याह अत्रेति। अत्र—विभक्त्यन्तानामेकशेषस्थले। अन्योऽन्यार्थानुप्रवेशात्,—सरूपाणां पूर्व्वपूर्व्वपदार्थानां चरमपदार्थे सम्बन्धवत्त्वात्। एकत्वाभावात्—एकस्यैव चरमपदार्थस्य द्वित्वसरूपपदार्थवाचकत्वेनैकवचनायोगात्।

(२) सहभावविवक्षायां साहित्यसम्बन्धे वक्तुमिष्टे सति द्वन्द्वैकशेषयोर्वृत्तिः व्यापारः। तत्र द्वन्द्व एकशेषो वा भवतीत्यर्थः। हि यस्मात् क्रमेणार्थप्रतीतौ—द्वन्द्वैकशेषघटकीभूतपदानां पृथगर्थप्रतीतौ, साहित्यसम्बन्धाविवक्षायामिति यावत्। द्विवचनादिकं न स्यात्, साहित्यसम्बन्धेन परस्परार्थानुप्रवेशस्यैव द्वित्वादिनियामकत्वादित्यर्थः। अत्र सहभावविवक्षाया आवश्यकत्वमेव, अन्यथा पयः पयो नयतीत्यत्र गौणमुख्यकर्म्मणोरेकशेषापत्तेरित्युक्तम्।

(३) सरूपाणां लिङ्गानामेकशेषः, सरूपाणां विभक्त्यन्तानामेकशेष इति मतद्वयमित्यर्थः।

(४) वृक्षयोर्वृक्षाणां वा पुष्पमिति शिष्टप्रयोगे पुष्पमित्येकवचनान्तपदं द्विबहुवचनान्तेन वृक्षशब्देन सह कथमन्वेतीत्याशङ्क्याह किन्त्विति—अत्र पुष्पमित्येकशेषनिष्पन्नमेव, "सरूपाणामेकशेष एकविभक्तौ"विति १।२।६४। पाणिनीयसूत्रे सरूपाणामेकशेषविधानसामर्थ्यादेव स्यादित्यर्थः।

बहुव्रीहि-समासः । (ह्)

पीतमम्बरं यस्यासौ पीताम्बरो हरिः । नीलमुज्ज्वलं वपुर्यस्यासौ नीलोज्ज्वलवपुः कृष्णः ।

(१०८) पुं णौऽदान्ते न इति । हरिभाविणी हरिभाविनी, श्रीभावेण श्रीभावेन । रम्यविणा, श्रीकामेण । रम्यपक्केन, रम्ययूना, रम्याह्ना ।

न च एकशेष व-विशेष इति वाच्यं, पथिभ्याम् ऋगभ्यामित्यादौ अकारत्व-प्रसङ्गात् । च-विशेष एकशेष इति कश्चित् । तन्मते पथिभ्याम् ऋगभ्यामित्यादौ तु मान्तविधेरनित्यत्वात् इति चेत् युञ्जावित्यत्र युजावित्ति स्यात् । पूर्व्वोक्तानामेकशेषमते (१) द्वे च दानि च तानि दानि इत्यादौ तु क्यन्तेनार्थकथनं, तथाच कणादभाष्ये "खल्वेकत्वेभ्योऽनेकबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धेस्तद्विनाशाद्विनाश" इति एकत्वे च एकत्वानि च इत्येकशेषं विधाय व्याख्यातमुदयनाचार्य्यैरिति । एकक्तौ किं ? ब्राह्मणाभ्यां ब्राह्मणाभ्यां दत्ता गौः । व्यक्तौ व्यक्तौ पदार्थे (२) प्रत्येकं शब्दाभिनिवेशात्(३) यावन्तस्ते पदार्थास्तावतां शब्दानां प्रयोगे प्राप्ते एकशेषो विधीयते । तथाच प्रत्यर्थं शब्दाभिनिवेश इति भाष्यम् । एवं पञ्चपूली च (४) पञ्चपूली च पञ्चपूली च पञ्चपूल्यः इत्यादि स्यात् ।

---

(१) तद्रूपाणां नानामेकशेष इति मते इत्यर्थः ।

(२) प्रतिव्यक्ति पदार्थत्वे सतीत्यर्थः ।

(३) शब्दप्रयोगनियमात् ।

(४) पूलः पूली च, पूलोपिठा इति भाषा, पालविशेषश्च ।

इह समानलिङ्गानां सरूपाणामित्येव, तेन माता जननी, माता (१) धान्यस्य, तौ मातृमातारौ इत्यादौ न स्यात्।

समार्थानाञ्च। समार्थानां विरूपाणामेकः शिष्यते। वक्रदण्डश्च कुटिलदण्डश्च तौ वक्रदण्डौ कुटिलदण्डौ वा।

मातापित्रोः श्वश्रूश्वशुरयोः पितृश्वशुरौ वा। मातापित्रोः पिता, श्वश्रूश्वशुरयोः श्वशुरः शिष्यते वा। माता च पिता च पितरौ, मातापितरौ। श्वश्रूश्च श्वशुरश्च श्वशुरौ श्वश्रूश्वशुरौ। इति चः (द्वन्द्वसमासः)।

इदानीं ह-सं विशेषतो निरूपयन्नाह पीताम्बर इत्यादि। अत्राहुः—

अप्रान्तान्यार्थानाम् एकार्थानां हः। द्व्यादित्यन्तान्यार्थपराणां समानाधिकरणानां दानां हः स्यात्। आरूढो वानरो यं स आरूढवानरो वृक्षः। आरूढा वृद्धा बहवो वानरा यं स आरूढवृद्धबहुवानरो वृक्षः। निर्जितः कामो येन स निर्जितकामः, उपनीतं भोजनं यस्मै स उपनीतभोजनः, एवम् उपनीतबहुभोजनः। निःसृतो जनोऽस्मात् स निःसृतजनः, एवं निःसृतद्विजनः। शुक्लः पटो यस्य स शुक्लपटः, एवं शुक्लमहापटः। उषितो विहगो यस्मिन् स उषितविहगः, एवम् उषितबहुविहग इत्यादि। उच्चैर्मुखः, नीचैर्मुखः, उच्चाहुरित्यादौ उच्चैरादीनाम् असत्त्ववाचित्वात् (२) सामानाधिकरण्याभावेऽपि गमकत्वात् सः।

---

(१) मातीति माधातोस्तृन्, परिमाणकारीत्यर्थः।

(२) गुणिवाचकत्वाभावात्।

स्वरादिपठितत्वात् (१) सामानाधिकरण्यमभ्युपगन्तव्यमिति कश्चित्। अस्तिचौरा नास्तिदोष इत्यादौ अस्तिनास्तिशब्दौ त्यन्तप्रतिरूपकनिपातौ। शस्तान्यार्थानान्तु दृष्टे देवे गतः (२)। एकार्थानां किम्? पञ्चभिर्भुक्तमस्य। पञ्च भुक्तवन्तोऽस्य इत्यत्रा-नभिधानात् न स्यात्। तथाच—कृत्तद्धितसमासाश्चाभिधानगम्या इति भाष्यम्।

संख्यादूराधिकासन्नव्यानां संख्येयसंख्यया। संख्यावाचिनाम-दूरादीनां व्यानाञ्च संख्येयवृत्तिसंख्यावाचिना सह हः स्यात्। द्वौ वा त्रयो वा द्वित्राः, त्रिचतुराः, पञ्चषाः, लक्षकोटाः। एकद्वान् दिवसांस्तिष्ठेत्। सप्ताष्टैर्दिनैर्यास्यति। वार्थ एवायं सः। वार्थोऽत्र संशयो न विकल्पः, संशयस्यैव उभयपक्षपरामर्शत्वेन व्वविषयत्वात्। अदूरे दशानाम् इमे अदूरदशाः (३) अधिका दशानाम् इमे अधि-कदशाः, आसन्ना दशानाम् इमे आसन्नदशाः, समीपे दशानाम् इमे उपदशाः, उपविंशाः। यदा समीपिप्राधान्यं तदा ह-सः, यदा समीपप्राधान्यं तदा व-स इति। संख्येय इति किम्? अधिका विंशतिर्गवाम्।

दिङ्नाम्नां विदिशि (४)। दिङ्नाम्नां हः स्यात् दिङ्मध्या-ख्यायाम्। पूर्व्वस्याश्च दक्षिणस्याश्च दिशोर्मध्ये या दिक्, सा पूर्व्व-

---

(१) स्वरादिपाठेनाव्ययत्वादव्ययानाञ्चानेकार्थत्वादित्यर्थः।

(२) शस्तं प्रथमान्तं पदं अन्यार्थः समस्यमान-पदार्थातिरिक्त-पदार्थौ येषां तेषामेकार्थानामपि समासो न स्यादिति दर्शयति दृष्टे इति।

(३) नव एकादश वेत्यर्थः। एवं परत्र।

(४) दिशोर्मध्ये विदिक् स्त्रियामित्यमरः।

दक्षिणा, एवं पूर्वोत्तरा, उत्तरपश्चिमा। दिङ्नामग्रहणात् यौगिके मा भूत् (१)। तेन ऐन्द्राश्च कौवेर्य्याश्च दिशोर्मध्ये या दिक् इत्यत्र न स्यात्।

त्रीह्यन्तयोः सरूपयोर्युद्धे व्यतीहारे। परस्पर-प्रहरणादिरूप-क्रियाकरणं व्यतीहारस्तत्र तुल्यरूपयोस्त्रीह्यन्तयोर्युद्धे वाच्ये हः स्यात्। दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं वृत्तं, दण्डादण्डि। केशेषु केशेषु गृहीत्वा आकृष्य वा इदं युद्धं वृत्तं, केशाकेशि। वृत्त-मित्यन्तर्भावितण्यर्थत्वात् वर्त्तितमित्यर्थः। अन्यथा भिन्नपत्वात् त्वाच् न स्यात् (२) अनभिधानात्। युद्धमिति उत्ताढम्। क्षत्रियेण क्षत्रियेण च प्रहृत्य इदं युद्धं वृत्तम् इत्यादौ तु ष-त्रान्तस्य न स्यात्। एवं प्रहरणाकर्षणग्रहणान्यक्रियाव्यतीहारे न स्यात्। तेन रथे च रथे च स्थित्वा इदं युद्धं वृत्तमिति। सरूपयोः किम्? हलैश्च मुषलैश्च प्रहृत्य युद्धं वृत्तमित्यादौ न स्यात्। युद्धे किम्? हस्तेन च हस्तेन च गृहीत्वा इदं क्रीड़नं सख्यं वा वृत्तम्।

तुल्ययोगे सहस्य त्रान्तेन। तुल्ययोगे वर्त्तमानस्य सह-शब्दस्य त्रान्तेन सह हः स्यात्। पुत्रेण सह आगतः सपुत्रः, सच्छात्रः। इहोभयोस्तुल्यमागमनम्। तुल्ययोगे किम्? "सहैव दशभिः पुत्रैर्भारं वहति गर्द्दभी"ति, विद्यमानैः पुत्रैरित्यर्थः। सपक्षः सधर्म्मा सलोकः सकर्म्मा सदृशः [illegible] इत्यादौ तु नीचै-

---

(१) ऐन्द्रादि यौगिके [illegible]।

(२) अन्यथा [illegible]।

सुगेव इतिवत् पूर्व्वेणैव सः (१) । तथाहि सह विद्यमानो पत्नावस्य इत्यादि वाक्यम् । तुल्यार्थं प्रायिकत्वात् स इति परे । अन्यान्यार्थत्वादप्राप्ते सूत्रचतुष्टयमुक्तम् (२) ।

विशेषण-स्त्रि-क्तान्तं प्राक् । एतानि पूर्व्वाणि स्युः । पीताम्बरः, चित्रगुः । कृतान्तकर्त्तृको घटः, गिरिप्रधानो देशः, समुद्रान्ता मही, विप्रपूर्व्वा वर्णाः, चूतादयो वृक्षाः, कर्म्मपराः मन्त्राः, कृतोत्तरा नृपाः, कृतोत्तरः नृपः, कृष्णप्रासिका गाथा इत्यादौ तु कृतान्तादिषु बलादीनां साध्यत्वेन प्राधान्याद्विशेष्यत्वम्(३) अतो न प्राग्भावः (४) । सर्व्वश्वेतः, सर्व्वकृष्णः । यत्र गुणशब्देन सह सः सोऽस्य विषयः (५) द्रव्यवाचिना सह से विशेषणत्वेनैव सिद्धत्वात् । क्तनष्टशकटः (६) । क्तसर्व्वशुक्लः । स्त्रिविशेषणाभ्यां सह यत्र सः सोऽस्य विषयः । ज्ञातराम इत्यादौ ज्ञातादेर्विशेषणत्वेनैव सिद्धत्वात् ।

---

(१) सहशब्दस्य साहित्यमर्थः, अतः तथात्वाविरुद्धसङ्ख्यादेरपि पूर्व्वनिपातेन गमकत्वात् सुगेवेत्यादिवत् समास इत्यर्थः ।

(२) संख्यादूरेत्यादि तुल्ययोगे सहशब्देन समं सूत्रचतुष्टयमित्यर्थः ।

(३) प्राधान्यतः कर्तृप्रधानादिशब्दानां विशेष्यत्वेन पूर्व्वनिपातः कृतान्तादौ तु परनिपात उचितः, इह तु कृतान्तादिविवक्षावशात् कर्तृप्रधानादीनामेव विशेष्यत्वम् । तस्मादिह शब्दे साध्यं प्रधानं, यदुक्तं—प्रधानं हि विशेष्यं स्यादप्रधानं विशेषणमिति ।

(४) कर्तृप्रधानादि शब्दानामिति शेषः ।

(५) अत्र श्वेतादयो गुणवचनाः द्रव्यशब्दाविशेषणार्थः ।

(६) क्तान्तस्य विशेषणत्वेनैव सिद्धे प्रत्युदाहरणात् क्तान्तविशेषणाभ्यां समासे क्तान्तस्यैव प्राग्भाव इत्यनेनोदाहरणेन सूचितम् ।

त्रिसंख्ययोः संख्या संख्यानां त्वल्पाः। त्रिसंख्ययोर्हि से संख्या प्राक् स्यात्, संख्यानां हस्वेदल्परूपा। द्वावन्यौ यस्मात् स द्व्यन्यः, त्र्यन्यः। सप्त गावो यस्य सप्तगुरित्यादौ तु विशेषणत्वात् पूर्व्वेणैव। द्वित्राः, पञ्चषाः।

स्यन्तात् पद्मादिः क्तान्ताच्च प्रहरणार्थः। हे पद्मादिः स्यन्तात् प्राक् स्यात्, प्रहरणार्थस्तु सोक्तान्ताभ्याम्। नाभौ स्थितं पद्मं यस्य स पद्मनाभः, गर्भे स्थिता दुहिता यस्याः सा दुहितृगर्भा, पद्महस्तः, कमण्डलुपाणिः, गडुकण्ठः, अन्तःशिरा (१) इत्यादि। पद्मादिः किम्? कण्ठेकालः, उरसिलोमा, धर्म्मेवृत्तयः। दण्डपाणिः शूलपाणिः चक्रपाणिः अस्युद्यत इत्यादि। प्रायिकोऽयं पूर्व्वनिपातः। तथाच "तमुद्यतनिशातासिं प्रत्युवाच जिजीविषु"रिति भट्टिः। "उद्गूर्णलोष्टलगुडैः (२) परितोऽनुबिद्ध"मिति माघः।

क्तान्ताज्जातिकालसुखादयः। जातिकालसुखादयः क्तान्तात् प्राक् स्युः। सारङ्गजग्धी, पलाण्डुभक्षिती। मासजाता। सुखजाता, दुःखजाता, अलीकजाता इत्यादि। प्राप्तोदकः, उपाहृतपशु (३) रिति तु प्रायिकत्वात्।

आहिताग्न्यादिषु वा। प्राप्तः पूर्व्वनिपातो वा स्यात्। आहिताग्निः, जातपुत्रः, जातदन्तः, जातश्मश्रुः, पीततैलः, पीतघृतः, ऊढ़भार्य्यः, गतार्थः, पक्षे अग्न्याहित इत्यादि।

---

(१) गडुर्गलगण्डः। [illegible]

(२) उद्गूर्णेति गुर् [illegible]

(३) उपाकृतो देव[illegible]।

स्थन्तोपमानादेर्दस्य लोपो दे। स्थन्तोपमानपूर्व्वस्य (१) दस्य लोपः स्यात् दे परे हे। कण्ठेस्थित इति बहुलं पे कृदन्ते इति स्था अलुक्, कण्ठेस्थितः कालोऽस्य कण्ठेकालः, उरसिस्थितानि लोमानि अस्य उरसिलोमा। उष्ट्रमुखमिव मुखं यस्य स उष्ट्रमुखः। उपमानावयवस्यैवोष्ट्रादे(२)रुपमानत्वमुपचारात्। ये तु लोपं न कुर्व्वन्ति ते वैयधिकरण्येऽपि कण्ठेकाल इत्यादौ हमुक्त्वा स्थितादि-पदं वृत्तावन्तर्भूतमित्याहुः। एवं उष्ट्रमुखमित्यादौ तु उष्ट्रादिशब्देन लक्षणया मुखमुच्यते। एवं परत्रापि बोद्धव्यम्।

विकारसमुदायष्यादेः। विकारसमुदाययोर्विहिता या षी तदन्तपूर्व्वस्य लोपः स्याद्धे (३)। सुवर्णानां विकारः सुवर्णविकारः, सुवर्णविकारोऽलङ्कारोऽस्य सुवर्णालङ्कारः। केशसमूहश्चूड़ा अस्य केशचूड़ः। विकारसमुदायेति किम्? राजदुहिता भार्य्या यस्य स राजदुहितृभार्य्यः। शास्त्रधन इत्यत्र शास्त्रशब्देन लक्षणया शास्त्रज्ञानमुच्यते।

प्रादेः कृदन्तस्य वा। प्रादेः कृदन्तस्य लोपः स्याद्वा। प्रपतितं पर्णं यस्मात् स प्रपर्णः, प्रपतितपर्णः।

नञोऽस्त्यर्थानाम्। नञः परेषामस्त्यर्थवाचिनां दानां हे लोपः स्याद्वा दे परे। अविद्यमानः पुत्रोऽस्य अपुत्रः, अविद्यमानपुत्रः।

---

(१) सप्तम्यन्तपदं उपमानपदञ्च पूर्व्वं यस्येत्यर्थः।

(२) उपमानस्य अवयवो यस्येति विग्रहः।

(३) विकारशब्दे समूहवाचकशब्दे च परे या षष्ठी भवति, तत्षष्ठ्यन्तपदं पूर्व्वं यस्य तादृशपदस्य लोपः स्यादित्यर्थः।

३२६। नञोऽनौ वाज्झसोः।

(नञः ६।, अनौ १॥, वा ।१।, अच्-हसोः ७॥)।

नञोऽचि परे अन् हसे च अः स्यात् से वा।

रम्यविणेत्यादि—रम्यो विः पक्षी यत्र वने तेन। श्रियां स्थितः कामोऽस्य तेन। हरिं भावयितुं शीलमस्याः सा। दानामैक्यविधानेऽपि धात् क्रीतादित्यादिज्ञापकात् स्याद्युत्पत्तेः प्रागपि क्तानां स इति। तथाच गतिकारकोपपदानां (१) कृद्भिः समासवचनं प्राक् सुबुत्पत्तेरिति भाष्यम्। श्रीभावेण इति—श्रीस्थितो भावो यस्येति वाक्यम्।

३२६। नञो। अन् च अश्च तौ। अच्च हस् च तौ तयोः। नास्त्यन्त इत्यादि—अन्तो नाशः। च्युतं च्युतिः। इदं नित्यमिति परे। तेषान्तु नान्त-नच्युतावसम्मतौ। अस्य सामान्य-स एव विषयः, हे पूरणीत्यत्र हग्रहणात्। तेन अब्राह्मणः अनीश्वर (२) इत्यादावपि स्यात्। वाशब्दस्य व्यवस्थावाचित्वात्—

अगः प्राणिनि नित्यम्। न गच्छति इति अगो वृषः, शीतेन जड़ीकृत इत्यर्थः। अप्राणिनि तु शैलवृक्षौ नगावगौ।

त्याद्यन्तेऽन् चाक्षेपे। त्याद्यन्ते परे अनौ स्यातां नित्यम् आक्षेपे गम्यमाने। अपचति जाल्मः (३) अनेधस्व पाप इति। आक्षेपे किम्? न पचति चैत्रः।

---

(१) गतिरुपसर्गः। (२) न ईश्वर इति विग्रहः।

(३) मूर्खः पक्तुं न जानातीति निन्दा।

नास्त्यन्तो यस्यासौ अनन्तः नान्तः। अच्युतः नच्युतः।

न नक्षत्रादिषु। नक्षत्रादौ नञोऽनौ न स्याताम्। नक्षत्रादिर्यथा—

नक्षत्रं नमुचिर्नाको नपान्नक्रो नपुंसकम्।
नवेदा नकुलो नभ्राट् नासत्या नख इत्यपि॥

न चरति न क्षीयते वा नक्षत्रं चरक्ष्योस्त्वे क्षदादेशो मनीषादित्वात्। न मुञ्चतीति नमुचिः मुचधोः किः। नास्त्यकं दुःखं यत्र नाकः। न पातीति नपात् पाधोः शत्व। तनूनपान्तं प्रजुहोतीति भट्टिः। न पातयतीति नपादिति क्विबन्तं इति कश्चित्। न क्रामतीति (१) नक्रः क्रमधोर्गमादित्वात् डः। न स्त्री न पुमान् नपुंसकं मनीषादित्वात् स्त्री दस्य लोपः, अकविधानञ्च। न वेत्तीति नवेदाः विदधोरस्। नास्ति कुलमस्य नकुलः। न भ्राजते नभ्राट्। सत्सु साधवः सत्याः न सत्या असत्या न असत्याः नासत्या। नित्यं त्वविषय एवायमिति परे। त्रिकाण्डे तु नासत्यौ देवभिषजौ इति सूर्य्यपत्नी संज्ञा तस्या नासाविनिःसृतत्वात् व्युत्पत्त्यन्तरेणेति। नास्ति खमिन्द्रियमस्य नखः। नैकं यशो यस्य स नैकयशाः, नैकगुणाः, नैककीर्त्तिरित्यादौ त्रयाणां दानां हे नञोऽनादेशो न स्यात्, परदयोरज्झसोर्विधानात्, से सर्व्वोत्तरदस्यैवोत्तरदत्वात्।

---

(१) दूरस्थत्वमिति शेषः।

३२७ । महत्तैकार्थे जातीयघासकरविशिष्टे तु ती च ।

(महत् ।६।,त ।१।,आ ।१।, एकार्थे ७।, जातीय—विशिष्टे७।, तु ।१।, ती ।१।, च ।१।) ।

महतस्त आ स्यात् एकार्थे, जातीयादौ तु ती च । महाबलः ।

३२८ । पुंवत् स्त्र्युक्तपुंस्कः स्त्रियां ङ्य-मानि-त-त्व-श्रसन्ततरादौ चारूप्ये ।

(पुंवत् ।१।, स्त्री ।१।, उक्तपुंस्कः १।, स्त्रियां ७।, ङ्य—तरादौ ७।, च ।१।, अरूप्ये ७।) ।

---

३२७ । महत्ते । महदिति लुप्तषीकं दम् । ती इत्यनेनाप्यन्वयात् त इति लुप्तप्रीकं दम् । आ इति लुप्तप्रीकं दम् । एकोऽर्थः यस्य स तस्मिन् । जातीयश्च घासश्च करश्च विशिष्टश्च तत्तस्मिन् । महाबल इति—महद्बलं यस्येति वाक्यम् । एकार्थत्वात् महादेव इति येऽपि स्यात् । जातीयादावसामानाधिकरण्येऽपि महतस्तत्योराकारः पृथग्विधानात्, तेन महतो महत्या वा प्रकारः महाजातीयः, महतो महत्या वा घासः महाघास इत्यादि । पूर्व्वसूत्राद्वानुवर्त्त्य तस्य व्यवस्थावाचित्वात् अमहान् महान् भूतः महद्भूतश्चन्द्रमाः, अमहती महती भूता महद्भूता ब्राह्मणीत्यादावभूततद्भावे न स्यात् । एकार्थे किम् ? महतः पुत्रो महत्पुत्रः ।

३२८ । पुंवत् । एकप्रवृत्तिनिमित्तेन उक्तः पुमान् येन

उक्तपुंस्कः स्त्रीलिङ्गः पुंवत् स्यात् एकार्थे स्त्रीलिङ्गे, ञ्यादौ च नतु रूप्ये।

सः। शस् अन्तो यस्य सः, तर आदिर्यस्य सः, शसन्तश्चासौ तरादिश्चेति सः, ञ्यश्च मानी च तश्च त्वश्च शसन्ततरादिश्च (१) तत्तस्मिन्। पुंस्त्वं सूक्तत्वात्। न रूप्योऽरूप्यस्तस्मिन्। एकार्थे इत्यनुवर्त्तते इत्याह एकार्थे स्त्रीलिङ्ग इति। चित्रगुरित्यादि वक्ष्यति। एकार्थत्वात् वृद्धा चासौ भार्य्या चेति वृद्धभार्य्या इत्यादौ येऽपि स्यात्। एकप्रवृत्तिनिमित्तेन एकबुद्धिग्राह्यत्वेनोभयार्थस्य सन्निकृष्टत्वादेक-प्रवृत्तिनिमित्तेनोक्तपुंस्कस्यैव पुंवद्भावः (२)। तेन द्रोणीभार्य्य (३)

---

(१) "तरप्तमप रूपप तरां तमां तथा। इष्टेयस् इमन् कल्पो देश्यो-देशीय इत्यपि। बहु-पाशपौ रूप्यमयट् चैते तरादयः"—इति दुर्गादासः।

(२) कोऽपि शब्दः कस्मिंश्चित् प्रवृत्तिनिमित्ते पुमांसमुक्त्वा प्रवृत्तिनिमित्तान्तरे स्त्रियमभिधत्ते, कोऽप्येकस्मिन्नेव प्रवृत्तिनिमित्ते पुमांसमभिधाय स्त्रियमभिधत्ते। भिन्ने प्रवृत्तिनिमित्ते उभयार्थाभिधानं विप्रकृष्टं बुद्धिद्वयग्राह्यत्वात्। एकप्रवृत्ति-निमित्ते उभयार्थाभिधानं सन्निकृष्टम्, एकबुद्धिग्राह्यत्वात्। अतस्तदुपक्रममेव युज्यते, अत एवाह—एकस्मिन् प्रवृत्तिनिमित्त इति। वृद्धभार्य्येति कर्म्मधारयः, वृद्धत्वं नाम सामान्यविशेषो वृद्धशब्दस्य प्रवृत्तिनिमित्तं, तमेकमर्थमुपादाय असौ पुंसि स्त्रियाञ्च वर्त्तते, वृद्धः पुरुषः वृद्धा स्त्रीति। तस्मादेकस्मिन् प्रवृत्तिनिमित्ते वृद्धशब्द उक्तपुंस्को भवति, स्त्रियाञ्च वर्त्तते। भार्य्याशब्दे स्त्रीलिङ्गे उत्तरपदे परे पुंलिङ्गस्येव रूपं भवति। * * * द्रोणीभार्य्येति द्रोणीशब्देनाप्युक्त एव पुमान् न पुनरेकस्मिन् प्रवृत्तिनिमित्ते, यस्मात् परिमाणविशेषं प्रवृत्तिनिमित्तमुपादाय परिमाणिनि पुंसि वर्त्तते। जातिविशेषमुपादाय स्त्रियां गवादन्यां वर्त्तते, यत्र गावोऽदन्ति सा गवादनी द्रोणीशब्देनोच्यते; तस्मान्न द्रोणीशब्द एकस्मिन् प्रवृत्ति-निमित्ते उक्तपुंस्कः—इति संक्षिप्तसारे समासपादे ४२२ सूत्रटीकायां गोयीचन्द्रः।

(३) ननु द्रोण्याः कथं भार्य्यात्वं सम्भवति? सत्यं, गौण्या वृत्त्या प्रयुक्तत्वात्।

इत्यादौ न स्यात्। द्रोणशब्दः परिमाणे पुंसि, काष्ठाम्बुवाहिन्यां स्त्रियां वर्त्तते, अतो भिन्नप्रवृत्तिनिमित्तेन बुद्धिद्वयग्राह्यत्वेनोभयार्थाभिधानस्य विप्रकृष्टत्वात् (१)। एकार्थस्त्रियां किम्? तरुणी प्रधानं यस्य स तरुणीप्रधानः। ङ्यादौ यथा—गौरीवाचरति गौरयते। दर्शनीयां मन्यते भार्य्यां चैत्रो दर्शनीयमानी भार्य्यायाः, पट्वा भावः पटुता पटुत्वम्, इयमनयोरतिशयेन शुभ्रा शुभ्रतरा शुभ्रतमा, पटुरूपा, पटिष्ठा पटीयसी. शुक्लिमा वृद्धकल्पा वृद्धदेश्या वृद्धदेशीया वृद्धपाशा, पटुचरी, बह्वीभ्यो देहि बहुश इत्यादि। अरूप्ये किम्? शुभ्रारूप्यः। एकस्या आगतम् एकरूप्यं तस्याः ततः, तस्यां तत्र, तया प्रकृत्या (२) तथा, तस्यां वेलायां तदा तर्हि इत्यादौ पुंवत् स्त्रेरिति पुंवद्भावः। तत्वे त्वजात्याख्य इति वक्ष्यमाणेनैव पटुता पटुत्वमित्यादौ सिद्धे इह तत्वग्रहणात् क्वचिदन्यत्रापि, तेन—

अपत्यार्थण्येयभिन्ने ताच्ये जातीये त्ये च पुंवत्। यथा हस्तिनीनां संघः हास्तिकं, श्येन्या इदं श्यैतं वासः, अग्नायी देवता अस्य आग्नेयः स्थालीपाक इत्यादि। अपत्यार्थण्येये तु रोहिण्या अपत्यं रौहिणेयः। श्यैनेयः। अजायै हिता अजथ्या (३) भूमिरिति।

तथाहि द्रोणीपदस्य लक्षणया द्रोणीसदृशीपरत्वात्। अथवा भार्य्यापदस्य भार्य्यासदृशरक्षणीयापरत्वादिति प्रयोगरत्नमालाटीका।

(१) असन्निहितत्वात्। (२) प्रकारेण।

(३) अजाशब्दात् हितार्थे थ्यन्प्रत्ययः। अत्र थ्यन्प्रत्यये परेऽपि पुंवद्भावः

३२९ । नाप्ताककोङ्पूरण्याख्यायुत्रक्तविकारार्थणित्तं जातिस्वाङ्गेष्वमानिनि ।

(न ।१।, अप्—णित्तं १।, जातिस्वाङ्गेषु ।१।, तु ।१।, अमानिनि ७।) ।

अबन्तं, तस्याकस्य वा केन ककारोङ्. पूरणीत्यान्तं, संज्ञाभूतम्, इस् उस् रक्तार्थविकारार्थवर्जं णितान्तञ्च, पुंवन्न स्यात्, जातिस्वाङ्गविहितिवन्तन्तु मानिन् वर्जं ।

कुक्कुट्यादेरण्डादौ । कुक्कुट्यादेः पुंवत् स्यात् अण्डादौ परे । असमानाधिकरणे अस्य विषयः । कुक्कुट्या अण्डं कुक्कुटाण्डं, मृग्याः क्षीरं मृगक्षीरं, मृग्याः पदं मृगपदं, काक्याः शावकः काकशावकः, प्राप्ता जीविका प्राप्तजीविका, द्वितीया भिक्षाया द्वितीयभिक्षा, उत्ताना शेते उत्तानशया प्रजाताभार्य्या यस्य प्रजातभार्य्यः, प्रसूता भार्य्या यस्य स प्रसूतभार्य्य इत्यादि शिष्टप्रयोगानुसारेण ज्ञेयम् । प्रजाताप्रसूताशब्दयोर्गर्भविमोचनकालप्रवृत्तिनिमित्तेन स्त्रियां वृत्तिर्न पुंसि, (१) नित्यस्त्रीत्वादत्र पाठः ।

३२९ । नोप्ता । तश्च अकश्च तौ, ताकयोः कः ताककः, स उङ् यस्य सः, ण् इत् यस्य सः, णित्तो यस्मात् तत्, इश्च उश्च तौ, युभ्यां स युसौ, अवयवापेक्षया द्वं, रक्तश्च विकारश्च

---

(१) प्रजातप्रसूतशब्दौ स्त्रियां गर्भविमुक्तौ वर्त्तेते, पुंसि तु गर्भोत्पत्तिनिमित्तमुपादाय, यथा प्रजाता ब्रीहयः, गर्भाधानस्य कारणताहता इत्यर्थः—इति कातन्त्रटीका ।

३३० । पूरणी प्रिया मनोज्ञा सुभगा दुर्भगा क्षान्ता कान्ता वामना वामा चपला बाला समा सचिवा तनया दुहितृ स्वा कल्याणी भक्ती ।

(पूरणी—भक्ती ७।) ।

एषु परेषु पुंवन्न स्यात् ।

तौ, तावर्थौ येषां ते, युमौ च रक्तविकारार्थाश्च ते, न विद्यन्ते ते यत्र णित्त्ये तत्, तच्च तत् णित्त्यञ्चेति । पश्चात् ऊप् च ताककोङ् च पूरणी च आख्या च अयुम्रक्तविकारार्थणित्त्यञ्च तत् । जातिश्च स्वाङ्गञ्च ते, ताभ्यां ईप् तत्, न मानी अमानी तस्मिन् । उदाहरणन्तु वामोरूभार्य्य इत्यादि वक्ष्यति ।

३३० । पूरणी । पूरणी च प्रिया चेति द्वन्द्वः । एष्विति—पूरणार्थत्यान्ते प्रियादिसप्तदशशब्देषु चेत्यर्थः । अन्ये तु क्षान्ता—तनययोः स्थाने क्षमातरुणावाहुः, बालावामाशब्दौ च नाहुः । इह द्रव्यार्थप्रियादिसाहचर्य्यात् ढत्यान्तस्य भज्यमानद्रव्यार्थस्य भक्तिशब्दस्य ग्रहणात् भावत्यान्ते न निषेधः । यथा मेघदूते—दृष्टभक्तिर्भवान्येति, रघौ—दृढ़भक्तिरिति (क) । कान्ताशब्दं परे नाहुः । कोङादीत्यादिना यसे पुंवद्भावात् ह्रस एवानयोर्विषयः ।

(क) रघौ—१२।१९ ; तत्र मल्लिनाथ :—दृढ़भक्तिरित्यत्र दृढ़शब्दस्य स्त्रियाः पुंवदित्यादिना पुंवद्भावो दुर्घटः, अप्रियादिष्विति निषेधात् भक्तिशब्दस्य प्रियादिषु पाठात्। अतो दृढ़ं भक्तिरस्येति नपुंसकपूर्व्वपदो बहुव्रीहिरिति गणव्याख्याने दृढ़भक्तिरित्येवमादिषु पूर्व्वपदस्य नपुंसकत्वस्य विवक्षितत्वात् सिद्धमिति समाधेयम् ।

सपत्न्यादीनाञ्च। सपत्न्यादीनां प्राप्तपुंवन्न स्यात्। सपत्नीभार्य्यः। सपत्नीवृन्दारिका (१)। सपत्न्यादिर्यथा—

सपत्न्यनडुही रोहिण्यनड्वाही च रेवती।
पृथिवी च सपत्न्यादाविह प्रोक्तायवादायणी॥

इत्तिकारश्च अदार्द्धनिर्वृत्तिमात्रपरो दृढ़भक्तिशब्दो लिङ्गविशेषस्यानुपकारत्वात् स्त्रीत्वमविवक्षितमेव। तस्मादस्त्रीलिङ्गत्वात् दृढ़भक्तिशब्दस्यायं प्रयोग इत्यभिप्रायः। न्यासकारोऽप्येवम्। भोजराजस्तु कर्म्मसाधनस्यैव भक्तिशब्दस्य प्रियादिपाठात् भवानीभक्तिरित्यादौ कर्म्मसाधनत्वात् पुंवद्भाव-प्रतिषेधः दृढ़भक्तिरित्यादौ भावसाधनत्वात् पुंवद्भावसिद्धिः पूर्व्वपदस्येत्याह"—इति। मेघदूते पूर्व्वमेघस्य ३७ श्लोकस्य मल्लिनाथटीकापि द्रष्टव्या।

"सामान्ये नपुंसकम्। दृढं भक्तिर्यस्य स दृढ़भक्तिः। स्त्रीत्वविवक्षायान्तु दृढ़ाभक्तिः"—इति सिद्धान्तकौमुदी।

"अदार्द्धनिवृत्तिमात्रपरत्वेनात्र दृढ़शब्दप्रयोगान्न लिङ्गविशेषविवक्षेति भावः। लिङ्गविशेषविवक्षायान्तु दृढ़ाभक्तिरित्यादिसिद्धये प्रियादिषु भक्तिशब्दपाठ" इति तत्त्वबोधिनी।

"दृढ़भक्तिरित्यादि त्वविवक्षितस्त्रीत्वात् पूर्व्वपदस्य। आर्षत्वादिति भागवृत्तिः" इति संक्षिप्तसारे।

आर्षत्वादिति भागवृत्तिरिति सिद्धान्तान्तरं, न ह्यार्षपदं स्वसिद्धौ प्रमाणभूतं लक्षणमपेक्षते इत्यभिप्रायः—इति गोयीचन्द्रः। प्रयोगरत्नमालायान्तु—"अयमेव समाराध्य इति विशुद्धाभिसन्धानं भक्तिः, तदर्थकभक्तिशब्देन पुंवत्, यथा महतीभक्तिनानेन नूनमाराधितो हरिरिति। अनुलेपनादिसम्भृत्यर्थे तु पुंवत्। भवति विरलभक्तिर्म्लानपुष्पोपहार इति। दृढ़भक्तिरिति गणोक्तस्यानित्यत्वाद्वाङः। अपि च सामान्योपक्रमान्नपुंसकम्। दृढं किन्तदित्याकाङ्क्षायां भक्तिरित्यन्वयः। इत्थं दृढं भक्तिर्यस्य स दृढ़भक्तिः। एवं शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या इति मेघे। यद्वा मत्वर्थलोपे दृष्टो भक्तिर्भक्तिमानिति नाप्यनुपपत्तिः" इत्युक्तं (८२६)। भवान्या दृष्टश्चासौ भक्तिर्भक्तिमांश्चेति कर्म्मधारय इति तट्टीका।

(१) वृन्दारिका श्रेष्ठा सुन्दरी च।

३३१ । गवावादेः स्त्रोऽन्ते गौण्येऽनीयसः ।

(गवावादेः ६।, स्त्रः १।, अन्ते ७।, गौण्ये ७।, अनीयसः ५।) ।

अन्ते स्थितस्य गोः आप ईप ऊपश्च स्त्रः स्यात् अप्रधानत्वे सति, नत्वीयसः । शीतगुः ध्वस्तमायः कान्ततनुः । ईयसस्तु बहुप्रेयसी ।

---

३३१ । गवा । आवादिर्यस्य सः, गौश्च आवादिश्च तत्तस्य । पुंस्त्वं सौत्रत्वात् । गुणस्य भावो गौण्यं तस्मिन् । न ईयोऽनीयस् तस्मात् । न त्वीयस इति—ईयसः परस्येपः प्राप्तस्त्रो न स्यात् इत्यर्थः । तेन सुप्रेयसी कुलमित्यादौ क्लीवे स्त्र इति स्त्रो न स्यात् ।

नार्द्धपिप्पल्यादेः । अर्द्धपिप्पल्यादेः प्राप्तस्त्रो न स्यात् । अर्द्धं पिप्पल्याः अर्द्धपिप्पली अर्द्धखारी पूर्व्वनगरीत्यादि । अर्द्धपिप्पल्यादेः किं ? प्राप्तो जीविकां प्राप्तजीविकः, आपन्नजीविकः ।

ईयसोर्हे । ईयसोर्हे एव स्त्रो न स्यात् । बह्व्यः प्रेयस्यो यस्य स बहुप्रेयसी पुरुषः कुलं वा । गौणत्वेऽपि ईपः सेर्लोपः स्यादेव । हे किम् ? अतिप्रेयसिः खलः, उपप्रेयसि प्रेम ।

लाघवादेकत्र सूत्रद्वयोदाहरणमाह शीतगुरित्यादि । शीता गौर्यस्येति वाक्यं, शीता शैत्यगुणयुक्तेत्यर्थः (१) । पट्वी च मृद्वी च पट्वीमृद्व्यौ, ते भार्य्ये यस्य स पट्वीमृदुभार्य्यः [illegible] पुंवद्भावः, एकार्थस्त्रीलिङ्गोत्तरपदे [illegible] भार्य्यस्तत्र य-गर्भेहः । एकार्थे किं ? [illegible]

---

(१) शीता शीतला गौः [illegible]

जवादेस्तु (२२९)—वामोरूभार्य्यः रसिकाभार्य्यः पाचिकाभार्य्यः षष्ठीजायः दत्ताजायः मैथिलीभार्य्यः। ब्राह्मणीभार्य्यः सुकेशीभार्य्यः। अमानिनि किं—ब्राह्मणमानिनी। युमादेस्तु वैयाकरणभार्य्यः सौवश्वभार्य्यः काषायकन्यः हैमसुद्रिकः।

पूरणादौ तु (२३०)—

माता। स्त्रियामिति किं? तरुणी प्रधानं येषां ते तरुणीप्रधानाः। ध्वस्तमाय इति—ध्वस्ता नष्टा इत्यर्थः। कालतनुरिति—काली कृष्णवर्णेत्यर्थः(१)। गवावादेः किम्? अतिलक्ष्मीः। वामोरूभार्य्य इति—वामोरूर्भार्य्या यस्य इति वाक्यम्। एवं धीवन्धूश्चासौ बाला चेति धीवन्धूबालेत्यादि (२)। रसिकाभार्य्य इति—रसं वेत्ति इत्यर्थे इकः। रसिकेति त-ककारोङ्। पाचिकाभार्य्य इति—पचतीत्यर्थे णकः। पाचिकेति अक-ककारोङ्। ताककोङ् किं? पाका भार्य्या यस्य पाकभार्य्यः (३) शुष्कभार्य्यः। षष्ठीजाय इति—षसां पूरणीत्यर्थे थट्। एवं पञ्चमीभार्य्य इत्यादि।

दत्ताजाय इति—यद्यपि संज्ञाशब्दानाम् एकद्रव्याभिनिवेशित्वात्

---

(१) कप्रत्ययेन बाधितत्वात् ईबन्तस्योदाहरणं बहुव्रीहौ न सम्भवतीति गङ्गाधरः। काली तनूर्यस्यासौ कालतनुः, पूर्वस्य पुंवद्भावः, अनभिधानादूपः कप्रत्ययाभावे ह्रस्व इति दुर्गादासः। वस्तुतो हि समासान्तविधेरनित्यत्वात् न कप्रत्ययः, अतएव अतिलक्ष्मीशब्दः सिद्ध इति गङ्गाधरः।

(२) २७८ सूत्रस्य टीका द्रष्टव्या।

(३) पाका बालेत्यर्थः। तथाच पाकशब्दोऽयमव्युत्पन्न एव शिशुवचनः, एवं शुष्कभार्य्य इत्यत्रापीति गोयीचन्द्रः।

इत्यर्थः (१)। स्त्रीप्रमाण इति—स्त्री प्रमाणी यस्येति वाक्यम्। पूर्व्वत्र प्रमाणीत्यस्याप्रधानस्यापि ग्रहणादः। स्त्रीत्वस्य उक्त-पुंस्कत्वाभावान्न पुंवद्भावः।

मध्वादि-क्रार्थनावादिभ्याम्। मध्वादेरेकत्वार्थनावादेश्च कः स्याद्वे। प्रियं मधु यस्य स प्रियमधुकः, अनर्थकः। मध्वादिर्यथा—

मधूपानदुरः शालि नञर्थौ दधिसर्पिषी (२)।

लब्धा नौर्येन स लब्धनौकः। नावादिर्यथा—

नौरनड्वान् पयो लक्ष्मीः पुमान् पञ्चेह कीर्त्तिताः।

क्रार्थे किं? द्वे नावौ यस्य द्विनौः।

स्त्रियामिनः। ह्वेऽन्यदार्थभूतायां स्त्रियामिनन्तात् कः स्यात्। बहवो वाग्मिनो यस्यां सा बहुवाग्मिका सभा। स्त्रियां किं? बहुदन्ती राजा (३)।

क्रद्व्रक्षतसान्ताभ्यां वा। क्रदन्तदीसंज्ञकात् अक्षतसान्ताच्च

---

(१) तत्र रात्रिः पूरणी पूरणप्रत्ययान्तवाच्या समासवाच्या च अर्थात् पूरण-प्रत्ययान्तकर्त्तृकवाच्या समासकर्त्तृकवाच्या च भवति, इति हेतोः पूर्व्वत्र पूर्व्वोदाहरणे पञ्चम्या मुख्यत्वम्—इति गङ्गाधरः। पूरण्यपि रात्रिः समासवाच्यापि रात्रिः इति हेतोः पूर्व्वत्र कल्याणीपञ्चमा इति पूर्व्वोदाहरणे पञ्चम्या मुख्यत्वं समस्यमानपदार्थान्यपदार्थयोर्भेदाभावात्। यद्यपि पञ्चमीरात्रीतररात्रेरपि समास-वाच्यत्वमस्ति, तथापि व्यापकत्वात् रात्रिरूपेण समानार्थतेति। कल्याण-पञ्चमीकः पक्ष इत्यत्र च पक्षस्य समासवाच्यत्वात् भेदोऽस्तीति पूरण्या मुख्यत्वं नास्तीति कार्त्तिकेयः।

(२) मधु, उपानह, उरस्, शालि, नञ्पूर्व्वकः अर्थशब्दः, दधि, सर्पिश्च।

(३) पक्षे चाक्रतसमासान्ताद्वेति बहुदन्तिक इति गोयीचन्द्रः। बहुदण्डीति पाठान्तरम्।

कः स्यात् वा हे। (१) बहुतन्त्रीः बहुतन्त्रीकः सुवधूः सुवधूकः। ऋद्राः किम् ? सुश्रीः सुभ्रूः (२)। बहुमानः बहुमानकः बहुयोगिकः बहुयोगी। कृतसान्तात्तु—प्रियपथः, प्रियधुरः।

नाख्यायाम्। संज्ञायां गम्यमानायां प्राप्तः को न स्यात्। विश्वो देवो यस्य स विश्वदेवः, विश्वयशाः।

ईयः स्वाङ्गार्थनाड़ीतन्त्रीभ्यः। ईयसः स्वाङ्गार्थाभ्यां नाड़ीतन्त्रीभ्याञ्च को न स्यात्। बहुप्रेयसी, बहुनाड़िः कायः, बहुतन्त्रीः ग्रीवा। स्वाङ्गे किं ? बहुनाड़ीको दिवसः, बहुतन्त्रीका वीणा, पूर्व्वेण वा (३)।

भ्रातुः स्तुतौ। (४) सुभ्राता लक्ष्मणः, पुण्यभ्राता विप्रः। स्तुतौ किं ? बहुभ्रातृकः क्रूरः।

निरः प्रवाण्याः (५)। निर्गता प्रवाणी शलाका यस्मात् स

---

(१) अत्र यस्मादकृतसमासान्तात् सूत्रान्तरेण कप्रत्ययो न प्राप्तस्तस्मादेवाकृतसमासान्तात् कप्रत्ययः अनेन विभाषया विधीयते। अतएव ऋदन्तनदीसंज्ञकात् व्यतः क इत्यनेन नित्ये प्राप्ते अकृतसान्तादित्यनेनाप्राप्तौ विभाषार्थं ऋद्रेति पृथगुक्तमिति बृहन्मुग्धबोधम्।

(२) नास्त्रीयुव इत्यनेन दीसंज्ञानिषेधात्।

(३) ईप्रत्ययान्ततन्त्रीशब्दो धमनीवचनः। नाड़ीति दिनस्य त्रिंशो भाग इति गोयीचन्द्रः। पूर्व्वेण ऋद्रकृत इत्यनेन।

(४) प्रशंसायां गम्यमानायां भ्रातृशब्दात् को न स्यादित्यर्थः। स्तुतिरत्र भ्रातृवाच्यस्यैव भवतीति गोयीचन्द्रः।

(५) निर उत्तरस्याः प्रवाण्या बहुव्रीहौ को न भवतीत्यर्थः। प्रवाणीति वे ञै स्यूतौ इत्यस्मात् अधिकरणे अनट्, एचोऽशित्याः इत्याकारः नोऽच्चोऽन्तर इत्यनेन णत्वम्। यस्यां शलाकायां वस्त्रं युज्यते सा प्रवाणीति गोयीचन्द्रः। निष्प्रवाणिः पटः अभिनव इत्यर्थ इति बृहन्मुग्धबोधम्।

३३४ । सहः सो वा । (सहः १।, सः १।, वा ।१।) ।

सहस्य हे सः स्याद्वा ।

सह मात्रा वर्त्तते योऽसौ समातृकः सहमातृकः ।

निष्प्रवाणिः पटः । क्वचिदन्यत्रापि । ब्राह्मणमानिनी । निःसृतनीव्यः, विलुलितकवरी प्रवरीत्यादयः ।

३३४ । सहः । सह इति ष्यर्थे प्री, अनुकरणात् तस्या अलुक् । समातृक इति—वाक्यस्य सानुपूर्व्विकत्वात् सह मात्रा वर्त्तते इति वाक्यमिति परे (१) । सह समानम् उदरमस्य सोदरः सहोदरः । "त्वं सोदरस्यातिमदोद्धतस्य" इति भट्टिः । हे इति किम्? सहकृत्वा (२) ।

गोहलवत्सेष्वाशिषि । निष्वेवाशिषि गम्यमानायां सहस्य सो वा स्याद्धे । स्वस्ति ते चैत्राय सगवे सहगवे सहलाय सहहलाय सवत्साय सहवत्साय । एषु किम्? स्वस्ति ते सहपुत्राय ।

संज्ञाधिक्यानुमेयग्रन्थसमासेषु नित्यम् । एष्वर्थेषु सहस्य सो नित्यं स्याद्धे । अश्वत्थेन सह वर्त्तते यत् तत् साश्वत्थं नक्षत्रचक्रम् ।

---

(१) समातृक इति वाक्यस्य सानुपूर्व्विकत्वात् सह मात्रा वर्त्तते इति वाक्यं साम्प्रदायाः कुर्व्वन्ति । ये तु मात्रा सह वर्त्तते इति वदन्ति तेषां मते सहपूर्व्वः निपातः, स च न सार्व्वत्रिकः तस्य तत्पुरुषादावप्रवृत्त्वादिति केचित् । • • • इत्युदाहरणात् प्रथमान्तान्यपदार्थबहुव्रीहिरनेनाङ्गीकृतः । अन्ये तु प्रथमान्तान्यपदार्थं बहुव्रीहिममन्यमाना मात्रा सहितः समातृक इति तृतीयातत्पुरुषं वदन्ति, तन्नयुक्तं, सूत्रे सहरूपेण निर्द्देशात् सहितस्यादेशानुपपत्तेः सहितशब्देन योगे मात्रा इत्यत्र तृतीयाया अप्राप्तेश्च—इति कार्त्तिकेयः ।

(२) सहकृतवान् य इति वाक्ये सहपूर्व्वक कृधातोः क्वनिप् ।

३३५। सक्थ्यक्ष्णः षः स्वाङ्गे।

(सक्थ्यक्ष्णः ५।, षः १।, स्वाङ्गे ७।)।

आभ्यां हे षः स्यात् स्वाङ्गे। दीर्घसक्थः, पुण्डरीकवदक्षिणी यस्यासौ पुण्डरीकाक्षः। स्वाङ्गे किं? दीर्घसक्थि शकटम्।

३३६। दारुण्यङ्गुलेः।

(दारुणि ७।, अङ्गुलेः ५।)।

पञ्चाङ्गुलं दारु।

एवं सपलाशं सशिंशपं स्थलम्। सकाकलीको द्रोणः, काकल्या अधिक इत्यर्थः। साग्निः कपोतः, गृहे कपोतपातात् भाव्यग्नि-रनुमीयते इत्यग्निरनुमेयः। एवं सपिशाचा वात्या (१)। साङ्गान् वेदानधीते, अङ्गानां समाप्तिं यावदित्यर्थः।

३३५। सक्थ्य। सक्थि च अक्षि चेति सक्थ्यक्षि तस्मात्। स्वाङ्गलक्षणमुक्तम्। स्वाङ्गवाचिभ्याम् आभ्याम् इत्यर्थः। पुण्डरीक-वदिति—पुण्डरीकं सितपद्मं, स्यन्तोपमानेत्यादिना वत्शब्द-लोपः। षित्त्वात् स्त्रियां दीर्घसक्थी पुण्डरीकाक्षीति। दीर्घ-सक्थीति—शकटस्य प्राणित्वाभावात् इति भावः। हे किं? दीर्घसक्थि देवदत्तस्य।

३३६। दारु। अन्यदार्थे दारुणि अङ्गुले षः स्याद्धे। पञ्चाङ्गुलमिति—पञ्चाङ्गुलयो यस्मिन् इति वाक्यम्। अङ्गुलितुल्या-

---

(१) वात्यया अनुमानभूतया साक्षादनुपलभ्यमानोऽत्र पिशाचोऽनुमीयते। अननुमेये तु विकल्प एव, सहविद्युन्मेघः सविद्युन्मेघ इति गोयीचन्द्रः।

३३७। द्वित्रेर्मूर्द्ध्नः। (द्वित्रेः ५।, मूर्द्ध्नः ५।)।

३३८। न्वोर्लोपौतौ तेऽच्ये।

(न्वोः ६॥, लोपौतौ १॥, ते ७।, अच्ये ७।)।

नस्य लोपः स्यात्, उवर्णस्य ओत् स्यादचि ये च ते। द्विमूर्द्धः।

३३९। सङ्ख्याया डोऽवह्वोः।

(सङ्ख्यायाः ५।, डः १।, अवह्वोः ५।)।

वयवयुक्तं धान्याद्युत्क्षेपणकाष्ठमुच्यते। दारुणि किं? पञ्चाङ्गुलि-हस्त इत्यत्र न स्यात्।

३३७। द्वित्रेः। द्विश्च त्रिश्च तत्तस्मात्। आभ्यां परस्मात् मूर्द्ध्नः षः स्यात् हे।

३३८। न्वोः। न च उश्च नौ तयोः, लोपश्च ओच्च तौ, अच्च यश्च तत्तस्मिन्, ते इति अस्य विशेषणम्। द्विमूर्द्ध इति—द्वौ मूर्द्धानौ यस्य इति वाक्यम्। एवं त्रयो मूर्द्धानो यस्य त्रिमूर्द्धः। आभ्यां किं? बहुमूर्द्धा। ओदुदयथा—बाभ्रविः बाभ्रव्य इत्यादि। पृथग्दकरणात् (१) क्वचिन्न स्यात्। तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुरिति कुमारसम्भवे।

३३९। संख्या। बहुवर्जाया इति—बह्वोरुपलक्षणत्वात् उपगणा इत्यत्र न स्यात्(२)तेनाकृतसान्तत्वात् उपगणका इत्यपि(३)।

---

(१) तान्ये इत्यकृत्वा तेऽच्ये इति करणादित्यर्थः।

(२) अत्र गणवर्ज्जाया इत्यपि वक्तव्यमित्यभिप्रायः।

(३) उपगणा इत्यत्र डे सति असति च रूपे विशेषो नास्तीति गणवर्ज्जनस्य फलं दर्शयति तेनेति।

बहुवर्जीयाः सङ्ख्याया डः स्यात् हे। पञ्च षट् परिमाणं येषां ते पञ्चषाः, उपगताः दश येषां ते उपदशाः। बह्वीस्तु उपबहवः।

३४०। नाभे र्नाम्नि। (नाभेः ५।, नाम्नि ७।)।

पद्मनाभः।

बहुवर्जनात् संख्येयवृत्तिसंख्याया एव ग्रहणं, तेनाष्टभिः सह वर्त्तते साष्टा पञ्चाशदित्यत्र न स्यात् (१)। पञ्चषा इति पञ्च वा षड् वा इति वाक्यमिति परे। एवमुपदशा इत्यत्र दशानां समीपे ये ते उपदशाः, नव एकादश वा इत्यर्थः। संख्यादूरेत्यादिना (२) यत्र सः तत्रैवायं विधिस्तेन शोभना दश येषां ते सुदशान इत्यत्र न स्यात् इत्यपि परे (३)। उपबहव इति—संख्यावड्डतीति संख्यात्वातिदेशात् प्राप्तौ निषेधः।

सोः श्वः-प्रातर्भ्याम्। सोः पराभ्यामाभ्यां डः स्यात् हे। शोभनं श्वोऽस्य सुश्वः सुश्वौ सुश्वाः, सुप्रातः सुप्रातौ सुप्राताः दिवसाः। तथाच "सुप्रातमासादितसम्मदं तत्" इति भट्टिः।

३४०। नाभेः। संज्ञायां गम्यमानायां नाभेर्डः स्यात् हे।

---

(१) संख्यावाचक एकादिदशशतिपर्यन्तशब्दः संख्येयवृत्तिरेव न तु संख्यानवृत्तिः, तस्मादेव डः। विंशत्यादिसंख्यावाचकः शब्दः संख्येयवृत्तिः संख्यानवृत्तिश्च। यदा विंशत्यादीनां संख्यानवृत्तित्वं तदा तस्मात् डो न स्यात्। तेन अष्टाभिः सह वर्त्तते साष्टा पञ्चाशदित्यत्र न स्यादिति कार्त्तिकेयः। अत्र साष्टन् इत्यस्मात् सौ साष्टा इति गङ्गाधरः। २०२ सूत्रस्य टीका द्रष्टव्या।

(२) २९६ पृष्ठं द्रष्टव्यम्।

(३) पूजार्थ-स्वति-वर्ज्जमिति च संक्षिप्तसारसूत्रम् (२२२)।

३४१ । लोम्नोऽन्तर्वहिर्भ्याम् ।

(लोम्नः ५। अन्तर्-वहिर्भ्यां ५॥) ।

अन्तर्लोमः वहिर्लोमः ।

३४२ । नञ्दुःसोः सक्थ्नो वा ।

(नञ्दुःसोः ५।, सक्थ्नः ५।, वा ।१।) ।

असक्थः असक्थिः ।

पद्मनाभ इति—नाभिस्थितं पद्मं यस्य इति वाक्यम् (१) । "प्रन्ना इवाङ्कादरविन्दनाभे"रिति तु मान्तविधेरनित्यत्वात् असंज्ञात्वाद्वा (२) । एवं नाभिस्थिता ऊर्णा यस्य, मनोपादित्वात् ष्ये, ऊर्णनाभो मर्कटः । ऊर्णनाभिरित्यन्ये । तथाच "प्रवृत्तिर्नो विना कार्य्यमूर्णनाभेरपीष्यते" इति भट्टवार्त्तिकम् ।

३४१ । लोम्नो । अन्तर्लोम इत्यादि—अन्तर्गतानि लोमानि यस्य, वहिर्गतानि लोमानि यस्य स इति वाक्यम् । अत्र नाम्नीति नानुवर्त्तते पृथग्योगात् । आभ्यां किं ? दीर्घलोमा चैत्रः ।

३४२ । नञ् । एभ्यः परात् सक्थ्नो डः स्यात् ह्रे वा । असक्थ इति—नास्ति सक्थि यस्य इति वाक्यम् । असक्थिरिति । एते उदाहरणे अस्वाङ्ग एव ज्ञेये, (३) स्वाङ्गे तु षः पूर्व्वेणैव ।

---

(१) पद्मं नाभिरस्येति अथवा पद्मं नाभावस्येति व्यधिकरणो बहुव्रीहिरिति २३५ सूत्र टीकायां गोयीचन्द्रः ।

(२) अरविन्दनाभिपदेन व्युत्पत्त्या मुरारिर्नेभ्यते, न तु संज्ञया, विष्णुपर्य्याये अनुक्तत्वादिति कार्त्तिकेयः ।

(३) सक्थि ऊरुः शकटाङ्गविशेषश्च ।

३४३। असू प्रजायाः। (असू ।१।, प्रजायाः ५।)।

अप्रजाः सुप्रजाः।

३४४। मन्दाल्पाच्च तु मेधायाः।

(मन्दाल्पात् ५।, च ।१।, तु ।१।, मेधायाः ५।)।

अमेधाः सुमेधाः मन्दमेधाः।

परे तु इह हलिशब्दस्यापि ग्रहणात् अहलः अहलिः दुर्हलः दुर्हलिः सुहलः सुहलिरित्यप्याहुः। अन्ये तु नञ्सुदुर्भ्यो हलि-सक्थिसक्तिभ्यो यथाक्रमसुक्ता अहलः अहलिः सुसक्थः सुसक्थिः दुःषक्तः दुःषक्तिः इत्याहुः। हलसक्त-शब्दाभ्याम् एव सिद्धत्वात् चान्द्रा हलिसक्ती न गृह्णन्ति। एकस्मिन्नर्थे प्रयोगद्वयसिद्ध्यर्थम् अकृतसान्तात् कविधानार्थञ्च हलिसक्तिग्रहणमित्यन्ये। एतत् सर्व्वं ग्रन्थकृन्मते वाशब्दस्य व्यवस्थया सिद्धमिति ज्ञेयम्। सक्ति-रिति सन्जधोः क्तिः।

३४३। असू। वेति नानुवर्त्तते, व्यतीहारे चिरित्यत्र वाग्रहणात्। नञ्दुःसुभ्यः प्रजाया असू स्याद्वे। अप्रजा इति। एवं दुष्प्रजाः सुप्रजाः, अत्वसोऽधोरिति घः (१)।

३४४। मन्दा। चकारान्नञ्दुःसोरित्यनुवर्त्तते। नञ्दुःसो-र्मन्दाल्पाच्च परस्या मेधाया असू स्याद्वे। अमेधा इति। एवं दुर्मेधाः सुमेधाः अल्पमेधाः। परे तु नञ्दुःसोर्मेधाया असू नित्यम्

---

(१) इह नञादेरव्यवहितोत्तरत्वमपेक्षितं तेन सुष्ठु गुणिनी प्रजा यस्य स सुगुणिप्रज इत्यादौ न स्यादिति दुर्गादासकार्त्तिकेयगङ्गाधराः।

३४५। धर्म्मादन्। धर्म्मात् ५।१, अन् १।१।

सुधर्म्मा।

अन्यस्मात्तु वेत्याहुः, तन्मते मन्दमेधाः मन्दमेधः अल्पमेधाः अल्प-मेधः इत्यपि (१)।

३४५। धर्म्मा। सुनाल्पमन्दाल्पाद्यो नानुवर्त्तन्ते, तेन सामान्यतोऽयं विधिः। सुधर्म्मेति समवमन्न इति धः। एवं सन्दिग्धधर्म्मा परधर्म्मा इत्यादि। इह केवलधर्म्मस्यैव ग्रहणात् सुचासौ धर्म्मश्चेति सुधर्म्मः, परमः सुधर्म्मो यस्य इति वाक्ये परमसुधर्म्मः इत्यादौ न स्यात्। परमः शोभनो धर्म्मो यस्येति वाक्ये परमसुधर्म्मा इति स्यादेव, केवलधर्म्मशब्दस्य इ-मावयव-त्वात् (२)।

---

(१) नित्यमसिच् प्रजामेधयोः (५।४।१२२) इति पाणिनि सूत्रम्। "नित्य-ग्रहणमन्यतो विधानार्थं, तेनाल्पमेधस इति सिध्यतीति हरिनाथादय" इति तत्त्व-बोधिनी। "एवं तर्हि नित्यग्रहणादन्यत्रापि भवतीति इष्यते। श्रोत्रियस्येव ते राजन् मन्दकस्याल्पमेधसः। अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी"। इति काशिका। अतएव तर्कवागीशेन "अन्यस्मात्तु वा" इत्युक्त्वा परेषामयं मतभेदो दर्शित इति।

(२) "धर्म्मादनिच् केवलात्" इति पाणिनीय सूत्रं (५।४।१२४)। केवलात् पूर्व्वपदात् परो यो धर्म्मशब्दस्तदन्तात् बहुव्रीहेरनिच् स्यात्। कल्याणधर्म्मा। केवलात् किम्? परमः स्वो धर्म्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत्। * * * सन्दिग्धसाध्यधर्म्मेत्यादौ तु कर्म्मधारयपूर्व्वपदो बहुव्रीहिः। एवं तु परमस्वधर्म्मे-त्यपि साध्वेव। इति सिद्धान्तकौमुदी। काशिकायामप्येवमेव। परमश्चासौ स्वश्च परमस्वः, स धर्म्मो यस्येति यदा विगृह्यते तदा परमस्वधर्म्मेत्यपि साध्वेव इति तत्त्वबोधिनी। संक्षिप्तसारे तु—"स्वकृतसमासान्तराद्धर्म्मादन्" (समासपादे ४६० सूत्रं)। प्रियधर्म्मा, साक्षात् कृतो धर्म्म एतैः साक्षात्कृतधर्म्माणो वेदितव्या इति

३४६। नञ्सुत्रिव्युपाच्चतुरोऽः।

(नञ्-सु-त्रि-वि-उपात् ५।, चतुरः ५।, अः १।)

सुतृणसोमहरिताज्जम्भाद्दन्ताहारयोः। स्वादिभ्यः परात् दन्ते आहारे च वर्त्तमानात् जम्भशब्दादन् स्यादे। शोभनो जम्भो दन्त आहारो वा यस्य सुजम्भा, तृणवज्जम्भो दन्तोऽस्य तृणजम्भा, हरितजम्भा। एभ्यः किं? पतितजम्भः। "दन्तयोरन्तरा क्षुद्रो दन्तो जम्भस्तथाशन"मिति रुद्रः।

दक्षिणादीर्म्माह्व्याधव्रणिते। दक्षिणात् परादीर्म्मादन् स्यादे व्रणश्चेद्व्याधकृतो भवति। दक्षिणस्थितमीर्म्ममस्य दक्षिणेर्म्मा मृगः (१)। अन्यत्र दक्षिणेर्म्मः शूकरः।

भाष्यम्। कृतसमासान्तरात्तु—परमः सुधर्म्मो यस्य स परमसुधर्म्मः अनुपालितकुलधर्म्मः" इत्युक्तम्। तत्र गोयीचन्द्रः—"अकृतं समासान्तरं यत्र तस्माद्धर्म्मशब्दाद्बहुव्रीहावन् भवति। * * * साक्षात्कृतो धर्म्म एतैरिति वाक्योपदर्शनं त्रिपदे बहुव्रीहावन् भवतीति सूचनार्थम्। केवलात् पूर्व्वपदात् परो यो धर्म्मशब्दस्तस्मादन् भवति, न पदसमुदायात्, अतस्त्रिपदे बहुव्रीहौ न भवतीति चन्द्र वर्द्धमानजयादित्यादयः। तन्निरासाय भाष्यमित्युक्तम्। नहि प्रत्यक्षस्मृतिर्बाधनीया भवति। परमः सुधर्म्मोऽस्येति धर्म्मशब्देन सह प्रथमं तत्पुरुषस्ततो बहुव्रीहिः। परमः शोभनो धर्म्मोऽस्येति त्रिपदे बहुव्रीहौ तु परमसुधर्म्मा इत्येव भवति। अनुपालितकुलधर्म्म इति प्रथमं षष्ठीसमासस्ततो बहुव्रीहिः। अनुपालितकुलं धर्म्मोऽस्येति बहुव्रीहावन् भवति। कृतसमासान्तरोऽत्र कुलशब्दो, न तु धर्म्मशब्दः। चन्द्रवर्द्धमानौ विकल्पेनानमिच्छतः" इति। तर्कवागीशेन भाष्यकारक्रमदीश्वरयोर्मतमनुसृतमिति प्रतीयते। कृतसमासपूर्व्वपदात् धर्म्मादन् न स्यादिति कार्त्तिकेयः।

(१) ईर्म्मं व्रणमुच्यते। दक्षिणमङ्गं व्रणितमस्य व्याधेन इ… स्वयं जाते व्रणे दक्षिणेर्म्मो मृग इति गोयीचन्द्रः।

एभ्यश्चतुरः षः स्यात् हेः। अचतुरः सुचतुरः।

३४७। भान्नेतुः। (भात् ५।, नेतुः ६।)।

३४६। नञ्। नञ् च सु त्रि वि उप एतस्मात्। अचतुर इति—अविद्यमाना धर्मार्थकाममोक्षाश्चत्वारो यस्य सोऽचतुरः। सुचतुर इति—शोभनाश्चत्वारो यस्य सः। एवं त्रयश्चत्वारो वा मानं येषां, त्रयो वा चत्वारो वा इति वा त्रिचतुराः(१)। विगताश्चत्वारो यस्य स विचतुरः। उपगताश्चत्वारो येषां, चतुर्णां समीपे वा उपचतुराः।

३४७। भा। मृगनेत्रेति—मृगो मृगशिरा नेता यस्याः सा। एवं हस्तनेत्रा पुष्यनेत्रा रात्रिरित्यादि। यस्य नक्षत्रस्य उदयमस्तकालं रात्रिः प्रवर्त्तते तत्तस्या नेत्र इति।

गोर्नासिकाया नस् च। गेः परस्या नासिकाया अः स्यात्, तस्मिन् नसादेशश्च हे। प्रगता नासिकास्य प्रणसम् उन्नसं मुखम्। नासिकां प्रति प्रादेरगित्वेऽपि गतादिक्रियानुगतत्वात् गित्वम् (२)। गेः किं? शोभना नासिका यस्य स सुनासिकः। अनु पश्चा-न्नासिका यस्य सः अनुनासिकः।

---

(१) संख्यया डो बहोरिति ड प्रत्ययस्य बाधकोऽयं अच इति कार्त्तिकेयः।

(२) "उपसर्गाच्च" (५।४।११९) इति पाणिनिसूत्रम्। उपसर्गग्रहणं प्रादीनामुपलक्षणं, नासिकासम्बन्धिक्रियार्थत्वेन तं प्रत्युपसर्गत्वायोगात्। न च क्रियायोगाभावेऽनुपसर्गत्वमस्तीति वाच्यम्। मार्गं प्रतिक्रियायोगमिन्द्रवर्गाणां उपसर्गात् सुनोतीति सूत्र प्रत्ययकारादाह—इति तत्त्वबोधिनी।

अस्थूलान्नाम्नि खरखुराभ्यान्तु वा त्यलुक्। स्थूलभिन्नात् परस्याः नासिकाया अः स्याड्डे संज्ञायां, तस्मिन् नसादेशश्च, खर-खुराभ्यां परस्यास्तु त्यस्य वा लुक् स्यात्। द्रुरिव नासिका यस्य द्रुणसः वार्द्ध्रीणसः। नाम्नि किम्? तुङ्गनासिकः। स्थूलात्तु—स्थूल-नासिको वराहः। खरा तीक्ष्णा नासिका अस्य खरणाः खरणसः, खुरणाः खुरणसः।

वेः ख्यग्रौ च। वेः परस्या नासिकायाः अः स्याड्डे, तस्मिन् ख्यग्रौ (१) आदेशौ, चकारात् नसादेशश्च। विगता नासिका अस्य विख्यः, विग्रः, विनसः। तथाच "विनसा हतबान्धवा" इति भट्टिः (२)। विखुरित्येके।

सुदिवाद्याः। सुदिवाद्या अदन्ता निपात्यन्ते। शोभनं दिवा यस्य स सुदिवः, (३) शारिकुक्षिरिव कुक्षिरस्य शारिकुक्षः, चतस्रो-ऽस्रयो यस्य स चतुरस्रः, (४) एण्या इव पादा यस्य स एणीपदः,

---

(१) भाष्ये सिद्धान्तकौमुद्याञ्च ख्य इत्यत्र ख्य इति दृश्यते।

(२) नसादेशं बाधित्वा ग्रादेश एव नित्यं भवतीति चन्द्रादिमतं, तन्निरासार्थं "विनसा हतबान्धवा" इति भट्टिप्रयोगो दर्शित इति गोयीचन्द्रः। सिद्धान्त-कौमुद्यान्तु—"कथं तर्हि विनसा हतबान्धवा इति भट्टिः? विगतया नासिकयो-पलक्षितेति व्याख्येय" मित्युक्तम्। विनसेति न प्रथमान्तं, किन्तु नसादेशे तृतीयान्त-मिति भाव इति तत्त्वबोधिनी।

(३) दिवाशब्दोऽयं स्वभावादधिकरणार्थप्रधानोऽव्ययम्। शोभनं दिवा अहरिति शोभनमिति कर्म्मणो विशेषणं, शोभनं [illegible] इति [illegible] टीकायां गोयीचन्द्रः।

(४) शारिः पक्षी। अस्रिः कोटिः।

३४८ । सङ्ख्यासूपमानात् प्रात् पादोऽहस्त्यादेः ।

(सङ्ख्या-सु-उपमानात् ५।, पात् ।१।, पादः १।, अहस्त्यादेः ५।) ।

एभ्यः पादस्य पात् स्यात् हे, न तु हस्त्यादेः ।

द्विपात् सुपात् व्याघ्रपात् । हस्त्यादेस्तु हस्तिपादः ।

अजपदः, प्रोष्ठपदः (१) । गोर्धूलिर्यस्मिन् काले स गोधूल इत्यन्ये ।

३४८ । संख्या । संख्या च सुश्च उपमानञ्च तत्तस्मात् । द्विपादित्यादि—द्वौ पादावस्य, व्याघ्रपादा इव पादा यस्येति वाक्यम् । हस्त्यादेस्तु—हस्तिपादः । हस्त्यादिर्यथा—

हस्ती कटोलः कण्डोलो गण्डोलो गणिका महान् ।
दासी कुशूल इत्यष्टौ हस्त्यादौ परिकीर्त्तिताः (२) ॥

इह महच्छब्दस्यानुपमानत्वेऽपि पाठात् क्वचिदनुपमानादपि पादस्य पात्, तेन गूढ़ौ पादावस्य गूढ़पात् । पादसमानार्थपात्-शब्देनेत्यन्यः ।

---

(१) प्रोष्ठो गौः, तस्येव पादावस्य प्रोष्ठपद इति सिद्धान्तकौमुदी । पाद-शब्दसमानार्थेन पदशब्देन एषां सिद्धिरिति चान्द्राः, न तद्रूढसम्मतमिति गोयीचन्द्रः ।

(२) कटोलश्चण्डालः । कण्डोलो धान्याधारविशेषः डोल इति ख्यातः । गण्डोलः वाटुल इति ख्यात—इति दुर्गादास-कार्त्तिकेय-गङ्गाधराः । अपरेऽपि कतिपये शब्दा हस्त्यादिगणे पाणिनीयैः पठ्यन्ते । तर्कवागीशेन तु संक्षिप्तसारमतमनुसृतम् ।

३४८। कुम्भादेरीपि। (कुम्भादेः ५।, ईपि ७।)।

कुम्भादेः परस्य पादस्य पात् स्यात् ङे ईपि परे।

(२२४) पात् पत् पौ। कुम्भपदी शतपदी। ईपि किं? कुम्भपादः।

३४८। कुम्भा। ईपीति विषयसप्तमी (१) तथा च स्त्रियामन्यपदार्थभूतायां कुम्भादेः पादस्य पात् स्याडे। कुम्भपदीति—कुम्भाविव पादावस्याः, शतं पादा अस्या इति वाक्यम्। कुम्भादिर्यथा—

कुम्भजालशताष्टैकद्रोणकुम्भ्यैकशूकराः।
सूत्रगोधाशकृद्दासीद्वीकालमनिञ्जवः (२)।
सुनिर्द्रोणः शितिस्त्राणो विष्णुच कथिता इमे (३)॥

इह केषाञ्चिदुपमानत्वात् पूर्व्वेणैव सिद्धे नियमार्थमिदमत आह ईपि किं कुम्भपाद इति (४)। ईपीत्युक्तेः पात्शब्दोत्तर[illegible] वाशब्दस्य व्यवस्थया कुम्भाद्यादिपात्शब्दात् स्त्रियां नित्यमीप् (५)।

---

(१) [illegible] इत्यर्थः।

(२) [illegible] इत्यर्थः। [illegible]

(३) [illegible]

(४) [illegible]

(५) [illegible]

३५० । व्यतीहारे चिः पूर्व्वो घोऽनच्या वा।

(व्यतीहारे ७।, चिः १।, पूर्व्वः १।, घः १।, अनचि ७।, आ।१।, वा।१।)।

व्यतीहारे यो हस्तस्मात् चिः स्यात्, पूर्व्वस्य च घः स्यात्, आ वा नत्वचि।

केशेषु केशेषु गृहीत्वा यद् युद्धं प्रवृत्तं—केशाकेशि।

दण्डैश्च दण्डैश्च प्रहृत्य यद् युद्धं प्रवृत्तं—दण्डादण्डि।

मुष्टामुष्टि मुष्टीमुष्टि, बाहाबाहवि बाहूबाहवि।

अचि तु असि असि।

इति हः।

३५०। व्यती। परस्परं प्रहरणादिरूपक्रियाकरणं व्यतीहारस्तस्मिन् तौस्यन्तयोरित्यादिना (१) यत्र हस्तत्रैवायं विधिः। दण्डादण्डीत्यादि—चित्त्वादग्रात् क्तेर्लुक्। मुष्टामुष्टीति—ये पूर्व्वस्यात्वं नेच्छन्ति तेषां मते तु मुष्टीमुष्टीत्येव।

द्विदण्ड्यादयश्चान्ता निपात्यन्ते। द्वौ दण्डावस्यां क्रियायां द्विदण्डि प्रहरति।

द्विदण्डि उभयापाणि द्विमुषल्येकपद्यपि।
उभाहस्त्युभयाहस्ति उभापाण्युभयाञ्जलि।
उभाकर्ण्युभयाकर्णि उभयादन्त्युभाञ्जलि।

स्त्रियाम्" इत्यनेनापीष्टसिद्धौ ईर्षीति ग्रहणमनर्थकं स्यात्। यदा ईष् सम्भाव्यते तदैव पाक्षाव इत्यर्थः। अतएवाह ईपि किं कुम्भपाद इति—इति दुर्गादासः।

(१) १९७ पृष्ठं द्रष्टव्यम्।

संहतपुच्छशुभादन्ति निकुच्यकर्णि इत्यपि।
उभाबाह्वभयाबाहु प्रोष्ठपद्यत्र सम्मतम्॥

अत्रोभयशब्दस्याप्रयोगेऽपि उभयापाणि इत्यादौ उभशब्दस्योभयादेशः। उभाबाहु उभयाबाहु इत्यत्र चेलुंक् निपातनात्। कर्णौ निकुच्य(१) धावति, प्रोष्ठस्य गोः पदं गृहीत्वा धावति इत्यर्थे निकुच्यकर्णि प्रोष्ठपदि इति षेऽपि चिर्गणपाठात्। क्रियाविशेषणानामेवाभिधानाद् द्विदण्डा शाला इत्यादौ न स्यात्।

धनुषो ङन् प्रायो वा तु नाम्नि। धनुषो ङन्(२) प्रायः स्याद्वे संज्ञायान्तु वा। गाण्डीवं धनुर्यस्य गाण्डीवधन्वा गृहीतधन्वा इत्यादि। प्राय इति किं? धृतधनुषमक्काय इति पुष्पदन्तः। पुष्पधन्वा पुष्पधनुः कन्दर्पः।

संप्राज्जानुनो ज्ञुर्वा तूर्द्ध्वात्। संप्राभ्यां जानुनो ज्ञुः स्यात् द्वे, ऊर्द्ध्वात्तु वा। संहतं जानु यस्य संज्ञुः। प्रगतं जानु यस्य प्रज्ञुः। ऊर्द्ध्वं जानु यस्य ऊर्द्ध्वज्ञुः ऊर्द्ध्वजानुः।

सुसंख्याभ्यां वयसि दन्तस्य दट्टः। सुशब्दात् संख्यावाचकाच्च परस्य दन्तस्य दट्ट स्याद्वे वयसि गम्यमाने। ऋट इत्। शोभना दन्ता अस्य सुदन् षोड़शदन् कुमारः, द्विदन् वत्सः (३)। वयसि किं? द्विदन्तो गजः।

स्त्रियां नाम्नि। स्त्रियामन्यदार्थभूतायां दन्तस्य दट्टः स्यात्

(१) निकुच्य आच्छाद्य इति कार्त्तिकेयः।
(२) ङ इत्, अनुस्थितिः। ङित्त्वादन्त्यस्य स्थाने।
(३) शिशुत्वावस्था त्विह गम्यते इति तत्त्वबोधिनी।

हे संज्ञायां गम्यमानायाम्(१)। सुदती, फालदती। नाम्नि किं? सुदन्ता।

अग्रान्त-श्यावादिभ्यां वा। अग्रान्तात् श्यावादेश्च परस्य दन्तस्य दत्‌: स्यात् हे वा। कुन्दकुड्मलाग्रवद्दन्ता यस्य कुन्दकुड्मलाग्रदन् कुन्दकुड्मलाग्रदन्तः, श्यावदन् श्यावदन्तः (२)।

श्यावारोक(३)वराहाहिवृषमूषिकगर्द्दभाः।
शिखरः शुद्धशुभ्रौ च श्यावादौ दश कीर्त्तिताः॥

ककुदस्य ककुदवस्थायां शैले तु त्रेः। अवस्थायां गम्यमानायां ककुदस्य ककुत् स्यात् हे, त्रेस्तु शैले(४)। अजातं ककुदमस्य अजातककुत् वत्सः, स्थूलककुत्तरुणः (५)। अवस्थायां किं? श्वेतककुदः। ककुदिव ककुदं शृङ्गादि, त्रीणि ककुदानि यस्य त्रिककुत्त्रिकूटः (६)।

---

(१) पृथग्योगात् सुसंख्याभ्यामित्यस्य वयसीत्यस्य च निवृत्तिः।

(२) श्यावः स्यात् कपिश इत्यमरः, कृष्णपीतमिश्रो वर्णविशेषः।

(३) अरोका अच्छिद्रा दन्ता यस्य सः अरोकदन् अरोकदन्त इति तत्त्वबोधिनी। अरोको निर्दीप्तिरिति काशिका। श्यावारोकाभ्यां संज्ञायामेव विभाषा इत्यपि काशिका।

(४) त्रिशब्दात् परस्य ककुदस्य ककुत् स्याद्धे शैले गम्यमाने इत्यर्थः।

(५) कालादिकृता वस्तुधर्म्मा वयःप्रभृतयोऽवस्था इत्युच्यते। असञ्जातककुत्, बाल इत्यर्थः। पूर्णककुत्, मध्यमवया इत्यर्थः। उन्नतककुत् वृद्धवया इत्यर्थः। स्थूलककुत्, बलवानित्यर्थः। यष्टिककुत्, नातिस्थूलो नातिकृश इत्यर्थ—इति काशिका (५।४।१४६)।

(६) ककुदाकारं पर्व्वतस्य शृङ्गं ककुदमित्युच्यते। न च सर्व्वस्त्रिशिखरः पर्व्वतस्त्रिककुत्। किं तर्हि? संज्ञैषा पर्व्वतविशेषस्येति काशिका (५।४।१४७)।

व्युद्भ्यां काकुदस्य काकुत् पूर्णात्तु वा। व्युद्भ्यां परस्य काकुदशब्दस्य काकुत् स्याद्, पूर्णात्तु वा। विगतं काकुदमस्य (१) विकाकुत्, उत्काकुत्, पूर्णकाकुत् पूर्णकाकुदः।

सुदुर्भ्यां हृदयस्य हृन्मित्रशत्र्वोः। आभ्यां मित्रशत्र्वोः क्रमात् हृदयस्य हृत् स्याद्। शोभनं हृदयमस्य सुहृन्मित्रं, दुष्टं हृदयमस्य दुर्हृत् शत्रुः। अनयोरिति किं? सुहृदयः साधुः, दुर्हृदयः खलः। आभ्यां किं? सहृदयं मित्रम्।

जायाया जानिः। जायाया जानिः स्याद्। युवती जाया यस्य युवजानिः, वृद्धजानिः (२), तथाच "युवजानिर्धनुष्पाणि"रिति भट्टिः।

इति बहुव्रीहिसमासः समाप्तः।

कर्म्मधारय समासः। (यः)

इदानीं यमाह। परमश्चासौ इत्यादि।

व्यवत् प्यन्तम्। इतःपरं सूत्रे यत् प्या निर्दिष्टं तद्वत् स्यात्। अतिदेशाद्दत्र पूर्व्वमिति पूर्व्वनिपातः।

विशेषणानां विशेष्यैः। विशेषणानां विशेष्यैः सह यः स्यात्। एकार्थानां दानां सो यसंज्ञ इत्युक्तम्। तत्र एकार्थता च

---

(१) तालु काकुदमुच्यते इति काशिका (५।४।१४८)।

(२) यद्यपि जानिः सीमन्तिनीवध्वोरिति मेदिन्यादौ वर्त्तते, तथापि युवती जाया यस्य इति वाक्ये युवजाय इति निवारणार्थं सूत्रकरणमिति गङ्गाधरः। यत्तु पत्नीजाय इति स्वयमुक्तं तत्समासान्तविधेरनित्यत्वज्ञापनार्थमिति दुर्गादासः।

सामानाधिकरण्यम् (१)। तच्च भिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नर्थे वृत्तिः (२)। सा च विशेषणविशेष्यरूपाणामेव भवति (३)। तत्र यत्सामान्याकारेण प्रवृत्तमनेकप्रकारि वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्य एकत्र प्रकारे व्यवस्थापयति तद्भेदकं विशेषणम् (४)। एवं यद्भेद्यं तद्विशेष्यम्। परमात्मा इत्यत्र परमशब्दार्थस्योत्कर्षस्य जीवात्मतः परमात्मव्यावर्त्तकत्वाद्विशेषण-

---

(१) समानं एकरूपम् अभिन्नमिति यावत् अधिकरणम् आश्रयो ययोः प्रवृत्तिनिमित्तयोः ते समानाधिकरणे, तयोर्भावः सामानाधिकरण्यम्, भावार्थे ष्यञः।

(२) भिन्नप्रवृत्तिनिमित्तानां—भिन्नानि पृथग्भूतानि प्रवृत्तिनिमित्तानि शक्यतावच्छेदकधर्म्मा येषां ते भिन्नप्रवृत्तिनिमित्तास्तेषाम्। अत्र विद्यालङ्कारः—भिन्ने प्रवृत्तिनिमित्ते पदार्थतावच्छेदके ययोरिति बहुव्रीहिस्तेन भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरित्यर्थ—इत्याह। नीलोत्पलमित्यत्र नीलत्वमेव नीलशब्दस्य तथा उत्पलत्वमेवोत्पलशब्दस्य प्रवृत्तिनिमित्तम्। एतयोरेकस्मिन् अर्थे उत्पलरूपे वृत्तिर्वर्त्तनं विद्यमानतेति यावत् सामानाधिकरण्यं भवति।

(३) विशेषणमिति—विपूर्व्वात् शिष् लृधौ तु विशेषे इत्यस्मात्, शिष क्लि असर्व्वोपयोगे इत्यस्मात् युजादेर्वा करणे अनट्, विशिष्यते अनेनेति विशेषणम्। असर्व्वोपयोगः परिशेषीकरणमिति दुर्गादासः।

(४) सामान्याकारेण—सामान्यरूपतया विशेष्यत्वेनाभिमतातिरिक्तवृत्तिधर्म्मतया इत्यर्थः। प्रवृत्तमिति—आरम्भे क्तः, वर्त्तमानमित्यर्थः। अनेकप्रकारीति—अनेकधर्म्मसमानाधिकरणमित्यर्थः। वस्त्विति—वस्तुपदं द्वितीयान्तं पदार्थपरम्। व्यवच्छिद्य—व्यावर्त्त्य इत्यर्थः। एकत्र प्रकारे—इति विषयसप्तमी, विषयोऽत्रानन्यशङ्कावः। व्यवस्थापयति—नियामयति, तस्मात् प्रकारात् अनतिरिक्तीकरोतीत्यर्थः। इति विद्यालङ्कारः। इतरेभ्यो व्यवच्छेदकत्वात् भेदकत्वम्, एकत्रप्रकारे व्यवस्थापकत्वाद्विशेषणम्। नीलेन भेद्यं प्रकारान्तरेभ्यो व्यवच्छिद्य एकत्र प्रकारे व्यवस्थापनीयं विशेष्यमुत्पलमिति गोयीचन्द्रः।

त्वम्। आत्मनो भेद्यत्वाद्विशेष्यत्वम्। एवं नीलोत्पलं, पुन्नवद्गृही, पाचकपुरुष इत्यादि। यद्यपि नीलादिवत् उत्पलादीनामपि इतरव्यावर्त्तकत्वं, तथापि नीलाद्याश्रयत्वेनोत्पलादीनां प्राधान्याद्विशेष्यत्वं, नीलादीनामुत्पलाद्याश्रितत्वेनाप्राधान्याद्विशेषणत्वम् (१)। अतएव नीलादीनामुत्पलाद्यधीनत्वात्तत्लिङ्गवचनत्वम्। कुब्जकुण्ठः कुण्ठकुब्जः, (२) विस्पष्टपटुः पटुविस्पष्टः, इत्यादौ द्वयोर्विशेषणत्वेऽपि विशेषणविशेष्यभावस्य कामचारादेकस्य विशेष्यत्वं कल्प्यते। अभिधानात् य-सः क्वचिन्नित्यः, क्वचिन्न स्यात्, क्वचिद्विकल्पः। यथा कृष्णसर्पः लोहितशालिः ; रामो जामदग्न्यः अर्जुनः कार्त्तवीर्य्यः ; नीलोत्पलं नीलमुत्पलमित्यादि(३)। विशेषणस्य

---

(१) नीलशब्दो हि गुणवृत्त्या द्रव्ये वृत्तत्वादप्रधानम्, उत्पलशब्दस्तु जातिवृत्त्या द्रव्ये वृत्तत्वात् प्रधानं ; यतो गुणः सत्येव द्रव्ये प्रवर्त्तते निवर्त्तते च, अतो गुणः द्रव्यस्य अनात्मभूतत्वादप्रधानम्। जातिर्हि द्रव्यस्योत्पत्तेः प्रभृत्याविनाशात् द्रव्यं न जहाति, अतः सा द्रव्यस्यात्मभूतत्वात् प्रधानम्। एतच्च श्वेतं छागमालभेत इत्यत्र एवं व्यवस्थितं; तथाहि श्वेतगुणयुक्तस्य छागस्याभावे वर्णान्तरयुक्तोऽपि छाग आलभ्यत एव, न तु श्वेतगुणयुक्तं द्रव्यान्तरमिति गोयीचन्द्रः (समासपादे ८६ सूत्रम्)।

(२) कुण्ठत्वञ्च क्रियायामल्पसंस्कारवत्त्वं कुब्जत्वञ्च पृष्ठवक्रतापादकसंस्कार इति उभयोरपि गुणशब्दत्वम्। कुण्ठत्वस्य यद्यप्यात्मगुणत्वं कुब्जत्वस्य देहगुणत्वं तथापि लक्षणया सामानाधिकरण्यं बोध्यम्। केचित्तु कुण्ठकुब्ज इत्यत्र सामानाधिकरण्यं विषयतैव, कुण्ठशब्दस्य कुब्जशब्दस्य चैकविषयत्वादिति भाव इति सिद्धान्तहारः।

(३) क्वचिदित्यनेन तदेव ग्राह्यं यत्र समासे रूढ्यादिहि लक्षणं इति रूढ्या शब्दवृत्तिरियम्। अतएव कर्म्मधारयादपि इह मतुबन्तो भवति, कृष्णसर्पवान् पर्वत इति। नहि बहुव्रीहिणा सोऽर्थः प्रतिपादयितुं शक्यते, कृष्णसर्पः पर्वत इति। एवं लोहितशालिरित्यादावपि। केचित् नीलोत्पलमित्यत्रापि नित्यमेव समासं मन्यन्ते, तन्मतादपि दर्शितम्। अतएव नीलोत्पलवत् इति भवति,

[illegible] । तेन [illegible]

[illegible]

[illegible]

[illegible]

[illegible] इति कश्चित् । [illegible] ।

[illegible] इत्यादि । [illegible] तु

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

दानामपि च-इसौ स्वीकृत्यापि राज्ञो गौश्च अश्वश्च पुरुषश्चेति, पञ्च भुक्तवन्तो ब्राह्मणा अस्येत्यादौ राज्ञो गवाश्वपुरुषाः पञ्चभुक्तवद्ब्राह्मण इत्यादि न स्यादनभिधानादित्याहुः । अन्यकृन्मते तु महन्नीलोत्-पलम् इत्यादिप्रयोगाभावनिश्चयश्चेदस्ति, तदा राज्ञो गवाश्वपुरुषा इत्यादिवत्तादृशप्रयोगाभावोऽनभिधानादिति प्रत्याख्यातम् । तथाच कालाः परिमाणिनेति (१) पाणिनीयसूत्रे काला इति व्वनिर्द्दे-शाच्चिदोऽप्ययं सः, तेन द्वे अहनी जाते अस्येति विग्रहे द्व्यह्नजात इत्यादि स्यादिति न्यासकृतोक्तमिति । अभिधानात् क्वचि-दन्यत्रापि—

एकादीनां यः । एकादीनां स्याद्यन्तेन सह यः स्यात् । एका चासौ शाटी चेति एकशाटी । एकादेः पूर्व्वनिपातः । सर्व्व-वेदाः । एकादिर्यथा,—

एक सर्व्व जरत् पूर्व्व समान नव मध्यमाः ।
जघन्यचरमौ वीर पुराणाऽपर केवलाः ।
मध्यः प्रथम एकादाविह पञ्चदश स्मृताः ॥

सामान्यशब्देनोपात्तत्वात् कार्षापणार्थपुराणशब्दस्य इह न ग्रहणम् । विशेषणविशेष्यत्वादेव सिद्धे एकपण्डितः सर्व्वशुक्लः जरत्पाचक इत्यादौ पूर्व्वनिपातार्थोऽयमारम्भः (२) ।

पूर्व्वकालस्य । पूर्व्वकालक्रियावाचिनः परकालक्रियावाचिना

---

(१) सकुन्दं सच्चिदानन्दमित्यस्य टीका द्रष्टव्या (४ष्ट) ।

(२) अन्यथा एकादीनां पण्डितादीनाञ्च द्वयोरेव विशेषणत्वात् कुब्जकुण्ठः कुण्ठकुब्ज इत्यादिवदनियमः स्यात् ।

सह यः स्यात्। आदौ स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः, लून-प्ररूढः, लिप्तवासितः, बद्धताडितः, स्नापितभोजितः। इदमपि पूर्व्वनिपातार्थम्।

दिक्संख्ययोर्नाम्नि। दिग्वाचिनः संख्यावाचिनश्च स्याद्यन्तेन सह यः स्यात् नाम्नि गम्यमाने। पूर्व्वा चासाविषुकामशमी चेति पूर्व्वेषुकामशमी (१), चतुर्व्विद्याः, पञ्चाम्राः, सप्तर्षयः। अत्र से एव संज्ञाप्रतीतिः वाक्याभावेऽपि बालबोधनार्थमर्थकथनम्। नाम्नि किम्? उत्तरा वृक्षाः, अष्टौ ब्राह्मणाः। विशेषणत्वादेव सिद्धे नियमार्थमिदं, तेनानाम्नि न स्यात् (२)। पञ्चपुराणानां दशदिक्षु पञ्चपुरुषगामिन्य इत्यादयोऽसाधव इत्यन्ये (३)। शिष्ट-प्रयोगदर्शनात् उत्सर्गत्वेन क्वचिदनाम्न्यपीत्यन्यः। चतुर्द्दिगीशा-

---

(१) पूर्व्वेषुकामशमीति देशविशेषसंज्ञेति प्रयोगरत्नमाला।

(२) कथं तर्हि "त्रिलोकनाथेन सदा मखद्विष" इति कालिदासः? त्रिलोकशब्दस्यासंज्ञात्वात्। न च समाहारे द्विगुः, द्विगोरिति ङीप्प्रसङ्गात्। न च पात्रादित्वं कल्प्यम्, "यदि त्रिलोकीगणनापरा स्यात्" इति प्रयोगविरोधात्। न चोत्तरपद इति समासः, त्रिपदतत्पुरुषस्येह दुर्लभत्वात्। अत्रोच्यते। लोकशब्दोऽत्र लोकसमुदायपरः। त्रयवयवो लोकस्त्रिलोकः, शाकपार्थिवादिः—इति प्रौढमनोरमा। तत्त्वबोधिन्यामप्येवमेव। मल्लिनाथमते त्रिलोकनाथेन इत्यत्र उत्तरपदद्विगुसमासः। रघुवंशे ३।४५ श्लोकस्य टीका द्रष्टव्या।

(३) "पञ्चपुराणैः पञ्चपुराणानां दशदिक्षु इत्यादयोऽसाधव" इति संक्षिप्तसारे दृश्यते (समासपादे ८६ सूत्रम्)। पञ्चपुरुषगामिन्य इति तु तत्र न दृश्यते। "कथं तर्हि पञ्चपुरुषगामिन्य इति? छान्दसोऽयं प्रयोग इति वाच्यम्, अथवा शिष्टप्रयोगदर्शनात् क्वाप्यनाम्न्यपि संख्यायाः समासो भवति। त्रिगुण-चतुर्व्वर्ग-षड्वर्गादयः षष्ठीसमासेन अथवा त्रिसङ्ख्यो गुण इत्यादौ वाक्ये शाकपार्थिवादित्वात् समासः" इति गोयीचन्द्रः।

नवमन्य मानिनी, द्विचन्द्रज्ञानमित्यादौ तु चतसृणां दिशां समाहारश्चतुर्द्दिक्, द्वयोश्चन्द्रयोः समाहारः द्विचन्द्रमिति समात्(१)। पूर्व्वासु वर्षासु भवः पौर्व्ववार्षिक इत्यत्र तु कालवाचिपूर्व्वशब्दस्यैकादित्वात् सः (२)।

कतरकतमयोर्जातिप्रश्ने। कतरकतमयोर्जातिप्रश्ने एव यः स्यात्। कतरकठः (३) कतमकठः। जातिप्रश्ने किं? कतरः पाठकः।

किमः क्षेपे। क्षेपो निन्दा, तस्यां गम्यमानायां किमो यः स्यात्। किंराजा यो न रक्षति महीं, (४) किंगौः यो न वहति भारम्। क्षेपे किं? को राजा पाटलिपुत्रे? प्रश्नेऽत्र किंशब्दः।

निन्द्यानां निन्दनैः। निन्दाविषयाणां निन्दाकरणैः (५) सह यः स्यात्। वैयाकरणश्चासौ खसूचिश्चेति वैयाकरणखसूचिः निष्प्रतिभ इत्यर्थः (६)। याज्ञिककितवः अयाज्ययाजनातृष्णा-

(१) ननु यद्यनाम्नि नायं समासस्तदा कथं चतुर्दिगीशानित्यादौ समासः? अत आह—चतुर्दिगिति। चतसृणां दिशां समाहारः चतुर्दिक्, चतुर्दिश ईशाश्चतुर्दिगीशा इति पश्चात्तत्पुरुषः। द्वयोश्चन्द्रयोः समाहार इति द्विचन्द्रं, पात्रादित्वात् स्त्रीत्वाभाव इति गोयीचन्द्रः।

(२) अत्र पूर्व्वशब्दस्य कालवाचित्वं, न तु दिग्वाचित्वम्, अतएव "एकादीनां य" इत्यनेनैव समासः।

(३) गोत्रञ्च चरणैः सहेति जातित्वमिति।

(४) महीरक्षणं हि राज्ञो धर्म्मस्तदकरणात्तस्य निन्देति गोयीचन्द्रः।

(५) निन्दनैरित्यनेन निन्दासाधनानां निर्देशात् निन्दादिपदोपादाने माभूदिति दर्शितमिति बृहन्मुग्धबोधम्।

(६) खसूचिरिति—यः पृष्टो निष्प्रतिभत्वात् खं सूचयति अहो गगनं निर्म्मलमिति, प्रश्नं विस्मारयितुं, स निष्फलव्याकरणाध्ययनत्वात् कुत्स्यते।

पर इत्यर्थः। तार्किकदुर्दुरूटः (१) नास्तिक इत्यर्थः। निन्द्यानां किं? वैयाकरणश्चौरः, न ह्यत्र वैयाकरणत्वं निन्द्यते, किन्तु चौरत्वम्। निन्दनैः किं? कुत्सितो विप्रः। विशेष्यस्य पूर्व्वनिपातार्थम् इदम्।

पापाणकयोर्निन्द्यैः। निन्दाविषयैः सह पापाणकयोर्यः स्यात्। पापनापितः, अणकनापितः (२)। इह पापाणकशब्दौ स्ववृत्त्यपरिज्ञाननिन्दावचनौ। निन्द्यस्य पूर्व्वनिपाते परनिपातार्थमिदम्।

उपमानस्य सामान्यवाचिना। उपमीयते येन तदुपमानं, सादृश्येन स्वभिन्नपदार्थपरिचायकम् इत्यर्थः। उपमानोपमेययोरेव साधारणो धर्म्मः सामान्यम्। तद्वाचिना सह उपमानवाचिनो यः स्यात्। शस्त्रीव श्यामा (३) शस्त्रीश्यामा देवदत्ता,

---

इति कैयटः। न हि स्वसूचनमेव निन्दा, किन्तु निष्प्रतिभत्वमत्र निन्दारूपं गर्भितं प्रतीयते। निष्प्रतिभतया हि वैयाकरणो निन्द्यो भवति। यतो व्याकरणाध्ययनसंवेदनसम्बन्धेन वैयाकरणशब्दस्तत्र प्रवृत्त—इति गोयीचन्द्रः।

(१) दुर्दुरूट इति—दुल उत्क्षेपे। दुर्पूर्व्वः। औणादिकः कूटप्रत्ययः। बहुलमन्यत्रापीति पोलुक्। रलयोरेकत्वस्मरणाल्लस्य र इति प्रौढ़मनोरमा तत्त्वबोधिनी च। अयुक्तिवादी दुर्दुरूटः, युक्तिमजानन् प्रगल्भ इत्यर्थ—इति, यो युक्तिमजानन् पृथिव्यादिकमीश्वरकृतं न भवतीति वदति स दुर्दुरूट—इति च प्रयोगरत्नमाला टीका।

(२) कुपूय कुत्सितोऽवद्य खेटगर्ह्याणकाः समा इत्यमरः। विज्ञेयः कुत्सितोऽणक इति च नाममाला।

(३) स्वल्पशस्त्रं शस्त्री, अल्पार्थे ईप्रत्ययः। शस्त्री तु छुरिका। "इह पूर्व्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते"—इति सिद्धान्तकौमुदी। ये सामान्यं धर्म्ममभिधाय सामान्यवति द्रव्ये वर्त्तन्ते, तेऽभि-

हंसश्येनी (१) शाटी। सामान्यवाचिना किं? पर्व्वता इव बलाहकाः (२)। उपमानस्येति किं? देवदत्ता इव श्यामा। कश्चित् श्यामत्वं गुणमुपादाय शस्त्रीशब्दो देवदत्तायां वर्त्तते, अतः सामानाधिकरण्यमित्याह। तन्मते शस्त्री चासौ श्यामा चेति वाक्यम्। वचनसामर्थ्याद्वैयधिकरण्येऽपि य इत्यन्ये। एवं परत्रापि।

उपमेयस्य व्याघ्राद्यैः सामान्याप्रयोगे। उपमेयवाचिनो व्याघ्राद्यैः सह यः स्यात् सामान्यस्याप्रयोगे सति। पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः। व्याघ्रादिर्यथा—

व्याघ्र पुङ्गव शार्दूल सिंह कण्ठीरवर्षभाः (३)।
वराह महिषाकर्ष पद्म कुञ्जर हस्तिनः।
कमलं पल्लवं नागः केशरी वृषभो हरिः।
वृषस्कन्द्रः किशलयं कड़ारोऽन्ये प्रयोगतः॥

सामान्याप्रयोगे किं? पुरुषो व्याघ्र इव शूरः। शूरत्वमिह उपमेयोपमानयोः पुरुषव्याघ्रयोः साधारणो धर्म्मः।

धीयन्ते। यथा शस्त्रीव श्यामा इत्यत्र श्यामाशब्द उपमानोपमेययोः साधारण-धर्म्मवचनः तद्धर्म्मयुक्तायां देवदत्तायां मत्वर्थीयलोपादभेदोपचाराद्वा वर्त्तत इति भवति सामान्यवाची—इति गोयीचन्द्रः।

(१) हंसीव श्येनी हंसश्येनी, पुंवद्भावः। श्येनीति श्वेतशब्दस्य स्त्रियां रूपं, पत्ततीशक्तीत्यादिना निपातनात् सिद्धम्।

(२) अत्र बलाहकशब्द उपमानोपमेययोर्न साधारणधर्म्मवाची। बलाहको मेघः।

(३) कण्ठीरवः सिंहो मत्तहस्ती वा।

श्रेण्यादेः क्रतादिना च्व्यर्थे। श्रेण्यादेः (१) क्रतादिना सह यः स्यात् अभूततद्भावे। अश्रेणयः श्रेणयः क्रताः श्रेणिक्रताः (२)। श्रेण्यादिर्यथा—

श्रेणिः कुङ्कुममुदकं पूगः।
कुशलं निधनं कुसुमं कूटः।
इन्द्रः क्रतिम पण्डित मुण्डम्।
निचयो निपुणो देव विशिष्टम्।
श्रमणस्वपत्नो राशिर्दृशदध्यापकः पटुः।
ब्राह्मणः चत्रियो भूतो वदान्यः क्रपणो मृदुः॥

कुङ्कुमविशिष्टयोः स्थाने पदार्थविषयशब्दौ पठत्यन्यः। क्रतादिर्यथा—

क्रत भूत समाम्नात सम्भावित निराक्रताः।
गत उक्त समास्नात समाख्यात विकल्पिताः॥
मतावधारित ख्यात मुक्त स्नात युतानि च।
कलितोपक्रताम्नातावधारितमुपाक्रतः (३)।
एकविंशतिरत्नोक्ता शेषं ज्ञेयं प्रयोगतः॥

---

(१) श्रेण्यादय इति श्लिष्टत्वात् श्रेणिशब्दस्य ह्रस्वेकारान्तस्य श्रेणीति दीर्घकारान्तस्य च ग्रहणं। *** श्रेणिपूगकूटाः समूहवाचकाः—इति प्रभाप्रकाशिका।

(२) यदा तु सिद्धा एव श्रेणयः सम्यक् क्रतास्तदा समासो नेष्यत इत्याशयेनाह अश्रेणयः श्रेणय इति। एकेन शिल्पेन पण्येन वा ये जीवन्ति तेषां समूहः श्रेणिः। च्व्यन्तानां तु कुगतीति नित्यसमासः परत्वात्—श्रेणीक्रतम्। इह तु च्वौ चेति दीर्घ—इति तत्त्वबोधिनी।

(३) संक्षिप्तसारे कलित इत्यत्र कथित इति पाठो दृश्यते।

श्रेणीभूतः पूगीभूत इत्यादौ तु श्रदादित्वात् (१) सः। च्व्यर्थे किम्? श्रेणयः कृताः।

अनञ्क्तस्य सनञ्क्तेन। अनञ्क्तान्तस्य सनञ्क्तान्तेन सह यः स्यात् (२)। कृतञ्च तदकृतञ्चेति कृताकृतं। कृतभागसम्बन्धात् कृतम्, अकृतभागसम्बन्धात् अकृतम्, अवयवधर्म्मेण समुदायस्य तथा व्यपदेशात् (३)। एवं क्लिष्टाक्लिष्टं, भुक्ताभुक्तम् इत्यादि।

कृतादेरपकृतादिना। कृतादेरपकृतादिना सह यः स्यात्। कृतञ्च तत् अपकृतञ्चेति कृतापकृतम्, अभिमतानभिमतयोर्भागयोः करणाकरणात् (४)। भुक्तञ्च तदभ्यर्हितत्वात् विभुक्तञ्चाशोभनत्वात् भुक्तविभुक्तं (५)। कियद्गतं कियत्प्रत्यागतं गतप्रत्यागतम् (६)।

---

(१) व्यस्य च्यनुकारेत्यादिना उर्य्यादित्वात् इत्यर्थः। उर्य्यादिस्थले श्रदादीति संक्षिप्तसारमतम् (समासपादे ५२ सूत्रम्)। यदि च्व्यर्थे समासोऽयं, तदा च्विप्रत्ययान्तानां श्रेण्यादीनाम् अभूततद्भावेऽर्थे अवगते कथं समासः? अत आह श्रदादित्वादिति। कृतभूतव्यतिरिक्तस्य च्विप्रत्ययस्यैवाभाव इति गोयीचन्द्रः।

(२) नञ्मात्राधिकेन नञ्रहितं समस्यते इति सूत्रार्थः, तेनेह न सिद्धं चाभुक्तं च—इति तत्त्वबोधिनी।

(३) ननु कृताकृतमित्यादौ कथं सामानाधिकरण्यं, न ह्येकं वस्तु कृतं स्यादकृतञ्च—इत्याशङ्क्याह कृतभागेति। "एकदेशकरणात् कृतम्, एकदेशान्तरस्याकरणात् तदेवाकृतम्"—इति तत्त्वबोधिनी। कृतं किञ्चित् धान्यस्य तण्डुलादि, अकृतं किञ्चित् तण्डुलस्यान्नादि इति कृताकृतं तण्डुलादिकमिति प्रभाप्रकाशिका।

(४) कृतापकृतमित्यत्राप्यसमाप्तिर्गम्यते, यत् कृतं तदेवापकृतं विरूपं कृतमित्यर्थावगमात्—इति कैयटः। अकरणादित्यत्र अप्रशस्ते नञ्, करणमप्यकरणमेवाप्रशस्तत्वात्—इति विद्यालङ्कारः।

(५) विशब्दोऽत्र अशोभनत्वं द्योतयति विरूपवत्—इति गोयीचन्द्रः।

(६) गतप्रत्यागतं श्लोकबन्धविशेष इति प्रभाप्रकाशिका।

यदा तु पूर्व्वं गतं पश्चात् प्रत्यागतमिति वाक्यं, तदा पूर्व्वकान्येति सः। क्रयश्चासौ क्रयिका (१) चेति क्रयाक्रयिका, मनोपाटित्वात् घं:। क्रयावयवत्वात् क्रयः, क्रयिकावयवत्वात् क्रयिका इति अवयवधर्म्मेण समुदायस्य तथा व्यपदेशाद्भेदः। एवं पुटापुटिका फलाफलिका मानोन्मानिका इति (२)।

सदादिपूज्यमानयोः पूज्यमाननागादिभ्याम्। सदादेः पूज्यमानवाचिना पूज्यमानवाचिनो नागादिना सह यः स्यात्। संश्चासौ पुरुषश्चेति सत्पुरुषः। सदादिर्यथा—

सन्महत् परमोत्कृष्टोत्तमाः पञ्च सदादयः।

पूज्यमानेन किम्? सन् भृत्यः, विद्यमान इत्यर्थः। उत्कृष्टो गौः, पङ्कादुद्धृत इत्यर्थः। गौश्चासौ नागश्चेति गोनागः। नागादिर्यथा—

नागो वृन्दारकश्चैव कुञ्जरोऽत्र त्रयो मताः।

व्याघ्रादित्वादेव सिद्धे सामान्यप्रयोगेऽपि यमविधानार्थमिदं, तेन नागवृन्दारकः शूरः (३) नरवृन्दारको बुधः। पूज्यमानस्येति किम्? मैत्रो नागः मूर्खत्वात्।

जातेः पोटादिप्रशंसार्थाभ्याम्। जातिवाचिनः पोटादिना प्रशंसावाचिना च सह यः स्यात्। इभ्या करेणुः, पोटा स्त्रीपुंस-

---

(१) क्रयशब्दात् स्वार्थे कः, क्लोनवित्रश्चयामान्, कायनार्गारके इत्यादिना अकारस्य इकारः।

(२) पुटश्चासौ पुटिका चेति, फलञ्च तत् फलिका चेति, मानञ्च तद् उन्मानिका चेति वाक्यम्।

(३) वृन्दं रूपं प्रधानत्वं वा अस्ति यस्य, गोलपेत्यादिना स्कन्दादित्वात् आरकप्रत्ययः। वृन्दारकः सुरे पुंसि मनोज्ञश्रेष्ठयो स्त्रिषु इति मेदिनी।

लक्षणा, इभ्या चासौ पोटा चेति इभ्यपोटा, गोवेहत्। पोटादिर्यथा—

पोटा वेहत् वशा धूर्त्तस्तोक श्रोत्रिय धेनवः।
प्रवक्ता युवतिर्गृष्टिस्तथा वस्कयनीत्यपि।
अध्यापकः कतिपयो दृश्च त्रिभिरिहेरिताः॥ (१)

वक इव वकः पुरुषः स चासौ धूर्त्तश्चेति वकधूर्त्त इत्यत्र निन्द्यानां निन्दनैरित्यनेनैव सिद्धे कठधूर्त्त इत्यादौ अनिन्दार्थं वचनम्। धूर्त्तकठः "जनयति कुमुदभ्रान्तिं धूर्त्तवको हि बालमत्स्याना"मित्यादयोऽसाधव इत्यन्ये, उत्सर्गत्वात् विशेषणविशेष्यत्वेनैव साधुत्वमित्यपरः। अत्र प्रशंसार्थशब्देन रूढ़िशब्दानां मतल्लिकादीनामेव ग्रहणम् (२)। गौश्चासौ मतल्लिका चेति गोमतल्लिका गोमचर्च्चिका गोप्रकाण्डं विप्रोद्घः विप्रतल्लजः (३)।

युनः पलितादिना। युवन्शब्दस्य पलितादिना सह यः स्यात्। युवा चासौ पलितश्चेति युवपलितः।

---

(१) उभयव्यञ्जना पोटेत्यभिधीयते (स्तनश्मश्र्वादियुक्ता स्त्री)। गृष्टिरेकवारप्रसूता। धेनुः प्रत्यग्रप्रसूता। वशा बन्ध्या। वेहत् गर्भोपघातिनी। वष्कयणी तरुणवत्सा—इति काशिका (२।१।६५)। प्रत्यग्रः अभिनवः, दुग्धपानाधीनजीवनो वत्सो यस्याः सा इत्यर्थः। संक्षिप्तसारे अध्यापक इत्यत्र अध्यायक इति पाठो दृश्यते। अधिपूर्व्वादिङो णकः वृद्धिरायादेशश्च—इति गोयीचन्द्रः (समासपादे १०२ सूत्रम्)।

(२) ये तु यौगिकाः प्रशस्तशोभनरमणीयादयो ये च विशेषवचना शुचिस्वद्वादयो ये च गौण्या वृत्त्या प्रशंसां गमयन्ति सिंहो माणवक इत्यादयस्ते सर्व्वे व्युदस्यन्ते—इति प्रौढ़मनोरमा तत्त्वबोधिनी च।

(३) गोमतल्लिकेत्येवमादीनां शोभनः प्रशस्तो गौरित्यर्थः। "मतल्लिका मचर्च्चिका प्रकाण्डमुद्घ तल्लजौ। प्रशस्तवाचकान्यमूनि" इत्यमरः।

पलितादौ तु पलितः खलतिर्वलिनो जरन्।

प्रायो नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं, तेन युवती चासौ पलिता चेति युवपलिता युवजरतीति।

त्य-तुल्यार्थयोरजात्या। त्यसंज्ञकत्यान्तानां तुल्यार्थानाञ्च जातिभिन्नवाचिभिः सह यः स्यात्। भोज्योष्णं पानीयशीतं, शीतपानीयोष्णपानीयादयोऽसाधवः इत्यन्ये। शीतगुणयुक्तं पानीयमित्यादिवाक्ये शाकपार्थिवादित्वात् सिद्धमित्यन्यः। तुल्यश्वेतः सदृशश्वेतः। तुल्यमहान् सदृशमहान् इत्यादौ तु सदादित्वात् प्राप्तः सोऽनेन बाध्यते परत्वात्। तस्य तु महापुरुष इत्यादौ विषयः। अजात्या किं भोज्य ओदनः।

वर्णानां वर्णैः। वर्णवाचिनां वर्णवाचिभिः सह यः स्यात्। कृष्णसारङ्गः कृष्णशबलः, सारङ्गशबलशब्दौ (१) मुख्यवृत्त्या समुदायवृत्तौ, अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीति न्यायात्। कृष्णशब्दो हि कृष्णावयवसम्बन्धात् समुदाये वर्त्तते इति गौणसामानाधिकरण्यात् पूर्व्वेणाप्राप्तेऽनेन यो विधीयते (२)। तत्र गौणत्वादिविशेषणत्वेन कृष्णशब्दस्यैव पूर्व्वनिपातः। यत्र तु अवयवसम्बन्धात् समुदायवृत्ती तत्र कामचारात् प्राग्भावः, यथा कृष्णशुक्लः शुक्लकृष्ण इति।

---

(१) सारङ्गः शबले त्रिलिङ्गकः।

(२) अत्र कृष्णादिशब्दा अवयवविशेषद्वारेणावयविनि वर्त्तमाना एव, न सर्व्वावयवद्वारेण। अतो मुख्यभावेन सामानाधिकरण्याभावादप्राप्तौ सूत्रान्तरेण कर्म्मधारयो विधीयते इति दुर्घटबोधम्।

कुमार्य्याः श्रमणादिना। कुमारीशब्दस्य श्रमणादिना सह यः स्यात्। कुमारी चासौ श्रमणा (१) चेति कुमारीश्रमणा। श्रमधोर्नन्द्यादित्वादनः। श्रमणादिस्तु—

श्रमणा तापसी दासी बन्धकी कुलटेत्यपि।
तथा प्रव्रजिता गर्भिण्यत्र सप्त प्रकीर्त्तिताः॥

कुमारस्य च मृद्वादिना। कुमारश्चासौ मृदुश्चेति कुमारमृदुः कुमारी चासौ मृद्वी चेति कुमारमृद्वी। मृद्वादिर्यथा—

मृदु पटु पण्डित चपला निपुणः।
कुशलाध्यापकमप्यभिरूपः॥

मृद्वादीनां कुमारीसामानाधिकरण्ये स्त्रीत्वमेव विशेषणत्वात्।

चतुष्पदां गर्भिण्या। चतुष्पदां जातिवाचिनां गर्भिण्या सह यः स्यात्। गोगर्भिणी अजगर्भिणी। चतुष्पदां किं ब्राह्मणी गर्भिणी, शरभी गर्भिणी (२)।

मयूरव्यंसकाद्याः। मयूरव्यंसकाद्याः शब्दाः यसंज्ञकाः निपात्यन्ते। व्यंसयति छलयति व्यंसको धूर्त्तः। विपूर्व्वादंसधोर्णकः। मयूरश्चासौ व्यंसकश्चेति मयूरव्यंसकः छात्रव्यंसकः काम्बोजमुण्डः। यवनमुण्डः।

एहीहादयोऽन्यार्थे। अन्यार्थे वर्त्तमानाः एहीहाद्याः मयूरव्यंसकादित्वात् यसे निपात्यन्ते। एहि इहेति यत्र कर्म्मणि वर्त्तते तत् एहीहम्, एहि यवैरिति यत्र कर्म्मणि वर्त्तते तत् एहियवम्, एहि वाणिजेति यस्यां क्रियायां सा एहि-

(१) श्रमणा-सन्न्यासिनी। (२) शरभः शलभः।

वाणिजा, एहि स्वागतमिति यस्यां क्रियायां सा एहिस्वागता, प्रोह कटमिति यस्यां सा प्रोहकटा, प्रोहकर्दमा आहरवसना आहरचेला आहरवनिता उद्धरचूडा उन्मिविधमा, भिन्धि लवण-मित्युच्यते यस्यां क्रियायां सा भिन्धिलवणा, पचलवणा, उद्धर उत्सृजेति यस्यां क्रियायां सा उद्धरोत्सृजा, उद्धमविधमा उत्पत-निपता अपचितपरचमा, उदक् च अवाक् च उच्चावचम्, उच्चैश्च नीचैश्च उच्चनीचम्, आचितञ्च उपचितञ्च आचोपचम्, आचितञ्च पराचितञ्च आचपराचं, निश्चितञ्च प्रचितञ्च निश्चप्रचं, नास्ति किञ्चिदस्य अकिञ्चनः नकिञ्चनो वा, पीत्वास्थिरकः भुक्त्वासुहितकः प्रोष्यपापीयान् इह पञ्चमी इह द्वितीया स्नात्वाकालकः उत्पत्य-पाकला जाता, निपत्यरोहिणी जाता, विषण्णश्यामा जाता इत्यादि। उद्धरोत्सृजेत्यादीनां त्यादिस्त्यादिना क्रियासातत्य इत्यादिना सिद्धेऽसातत्यार्थं गणे पाठः। पीत्वास्थिरक इत्यादौ से सत्येक-पदत्वात् पीत्वास्थिरकस्य इदम् इत्यर्थे ष्णे पैत्वास्थिरकं भौक्त्वासुहि-तकं प्रौष्यपापीयसम् इत्यादौ ष्णित्ते आद्यचो वृः।

ह्यन्तं टेनाभीक्ष्ण्ये वे। आभीक्ष्ण्ये गम्यमाने मयूरव्यंसकादित्वात् ह्यन्तं वसे निपात्यते, यदि वसो टसात्। जहि जोडमिति यः पुनःपुनराह स जहिजोडः (१) जहिस्तम्बः उज्जहिजोड उज्जहिस्तम्बः।

त्यादिस्त्येन क्रियासातत्ये। त्याद्यन्तं त्याद्यन्तेन सह क्रिया-सातत्ये गम्यमाने वसे मयूरव्यंसकादित्वात् निपात्यते। अश्नीत

(१) जोड इत्यत्र जोट योह इति पाठभेदो दृश्यते।

कर्म्मधारय समासः । (यः) ।

परमश्चासावात्मा चेति—परमात्मा ।

संश्चासौ चिच्चासावानन्दश्चेति—सच्चिदानन्दः ।

३५१ । कोङादिः पुंवद् यजातीयदेशीये तत्वे त्वजात्याख्यः ।

(कोङादिः १।, पुंवत् ।१।, य जातीय देशीये ७।, तत्वे ७।, तु ।१।, अजात्याख्यः १।) ।

पिवत इति यस्यां क्रियायां सा अश्नीतपिवता पचतभृज्जता खादतमोदता इत्यादि ।

शाकपार्थिवाद्याः । शाकपार्थिवाद्या निपात्यन्ते । शाकः शक्तिः प्रधानं यस्य स शाकप्रधानः, शाकप्रधानः पार्थिवः शाकपार्थिवः, मेरुनामा महीभृत् मेरुमहीभृत्, सुग्रीवनामा कपिः सुग्रीवकपिः, श्रीहर्षनामा नृपतिः श्रीहर्षनृपतिः, सुखयुक्ता नासिका सुखनासिका, त्रिगुणीकृता जगती त्रिजगती, अर्द्धावशिष्टं मृतम् (१) अर्द्धमृतम् इत्यादि । शाकपार्थिवादिराकृतिगणः । अविहित-यस-लक्षणो मयूरव्यंसकादौ द्रष्टव्य आकृतिगणत्वात् । एषां मयूरव्यंसकादीनां यान्तरं न स्यात्, तेन परमो मयूरव्यंसकः ।

३५१ । कोङा । कोङ् च पूरणी च ते आदी यस्य सः । यश्च जातीयश्च देशीयश्च तत्तस्मिन् । तश्च त्वश्च तत्तस्मिन् ।

---

(१). मृतमित्यत्र हतमिति क

कोङ्पूरण्यादिः पुंवत् स्यात् याद्यौ, तत्वयोस् जातिसंज्ञा-वर्ज्जम्।

पाचकस्त्री पञ्चमभार्य्या।

जातिश्च आख्या च ते, ते न स्तो यत्र सः, कोङ्पूरण्यादिरित्यादि। कोङादयो नोताककोङ् इत्यादिसूत्रे ये पठितास्ते पुंवत् स्युः ये जातीये देशीये च परे। पाचकस्त्रीति पाचिका चासौ स्त्री चेति वाक्यम्। एवं रसिकभार्य्या इत्यादि। पञ्चमी चासौ भार्य्या चेति वाक्यम्। दत्तभार्य्या संचितभार्य्या महाष्टमी महानवमी सुन्दरप्रिया कल्याणमनोज्ञा इत्यादि। वैयाकरणभार्य्या सौवर्ण-भार्य्या काषायकन्या हैमसुद्रिका ब्राह्मणमानिनीत्यादि तु निषे-धाभावात् पूर्व्वेणैव सिद्धम्। नोताककोङ् इत्यादिना येषां निषेधः प्राप्तस्तेषामनेन पुंवद्भावः, तेन मल्लिकावृन्दारिका द्रोणीभार्य्या कुमारीतनुजा इत्यादौ न स्यात्। जातीये पूर्व्वेणाप्राप्ते देशीये कोङादित्वादप्राप्ते विधिरयं—तार्किकजातीया कारकजातीया तार्किकदेशीया इत्यादि। अजात्याख्य इत्यस्य विशेषपरत्वात् गुणवचनस्यैव तत्वयोः पुंवत्, तेन पट्व्या भावः पटुत्वं मृदुत्वम् इत्यादौ स्यात्, न तु कठीत्वं दत्तात्वं पाचिकात्वं व्यभि-चारिणीत्वम् इत्यादौ। ये तु क्रियापि गुणः इत्याहुः तन्मते पाचकत्वं व्यभिचारित्वम्। तन्वीत्वमित्यादौ तु नोताककोङ् इत्यादिना निषेधः। ऊङित्यनेन यस्मात् ऊप्रत्ययवस्तुत्वस्यापि ग्रहणात्। कोङ्पूरण्यादौति किं? ब्रह्मबन्धूवाला(१)। याद्दौ किं

---

(१) कदम्बाद्गृहजातीया कन्येत्यर्थः।

३५२। द्वित्र्यष्टाधिका द्वात्रयोऽष्टाः स्त्रिदशाद्ये ऽन्त्यषट्के त्वनशीतौ वा।

(द्वित्र्यष्टाधिकाः १।।।, द्वात्रयोऽष्टाः १।।।, त्रिदशाद्ये ७।, अन्त्यषट्के ७।, तु ।१।, अनशीतौ ७।, वा ।१।)।

एषामेते क्रमात् स्युः दशादित्रिके, चत्वारिंशदादि षट्के अशीतिवर्जे तु वा। द्व्यधिका दश द्वादश, त्रयोदश, अष्टादश।

द्वाचत्वारिंशत् द्विचत्वारिंशत्। अनशीतौ किं ? द्व्यशीतिः।

रसिकाभार्य्यः, पञ्चमीवाचरति पञ्चमीयते, आत्मानं पाचिकां मन्यते पाचिकामानिनी, कुत्सिता दत्ता दत्तापाशा, पाचिकाकल्पा हंसीरूप्या ब्राह्मणीदेश्या सुकेशीकल्पेत्यादि।

३५२। द्वित्र। द्वौ च त्रयश्च अष्ट च ते, तैः सहिता अधिकाः, द्व्यधिकत्र्यधिकाष्टाधिका इत्यर्थः। द्वाश्च त्रयश्च अष्टाश्च ते। दश आद्या येषां ते दशाद्याः, त्रयाणां दशाद्यानां समाहारस्त्रिदशाद्यं, पात्रादित्वान्नेप् तस्मिन्। षषां समूहः षट्कम्, अन्त्यञ्च तत् षट्कञ्चेति तत्तस्मिन्। न अशीतिरनशीतिः तस्याम्। एषामित्यादि— द्वित्र्यष्टन् इत्येतेषां स्थाने द्वा त्रयस् अष्टा इत्येते आदेशाः क्रमात् स्युः दशादित्रिकसंख्याशब्दे परे द्वित्र्यष्टानश्चेदधिका भवन्ति। इह त्रिदशाद्यशब्देन दशविंशतित्रिंशत्शब्दानामेव ग्रहणम्। अन्त्यषट्के अशीतिवर्जनात् पञ्चसु एते आदेशा इत्यर्थः। द्व्यधिका दश इत्यादि शाकपार्थिवादित्वादधिकशब्दलोपे द्वाद्यादेशः। एवं द्वाविंशतिः त्रयोविंशतिः अष्टाविंशतिः द्वात्रिंशत् त्रयस्त्रिंशत्

३५३। वैकोनस्यैकाद्वैकान्नौ सङ्ख्यायाम्।

(वा।१।, एकोनस्य ६।, एकाद्व-एकान्नौ १॥, सङ्ख्यायां ७।)।

एकाद्वविंशतिः एकान्नविंशतिः एकोनविंशतिः।

३५४। सख्यह्नोराज्ञः षः षगे च।

(सखि-अहन्-राज्ञः ५।, षः १।, ष-गे ७।, च ।१।)।

एभ्यः षः स्यात् ये पे गे च।

प्रियसखः परमाहः महाराजः।

अष्टात्रिंशत् इति। एवं द्वाचत्वारिंशत् द्विचत्वारिंशत् त्रयश्चत्वारिंशत् त्रिचत्वारिंशत् इत्यादि। एवं पञ्चाशत्-षष्टि-सप्तति-नवति-शब्दे परेऽपि। द्व्यशीतिः त्र्यशीतिः; अष्टाशीतिरिति सर्व्वत्र्व। एषु किं? द्विशतं त्रिशतम् अष्टशतम् इत्यादि।

३५३। वैको। एकाद्वश्च एकान्नश्च तौ। वाद्वयमध्यवर्त्तित्वात् नित्ये प्राप्ते वाग्रहणम्। परे तु ऊनार्थनञः प्रकृतिवद्भावं विधाय एकशब्दस्यादुगागमं कुर्व्वन्ति (१)। एकाद्वविंशतिः एकान्नविंशतिः। एकोनविंशतिस्तु ऊनशब्देनैव।

३५४। सख्य। षगे चेति षगात्परश्चकारो यसमेवानुकर्षतीत्यत आह ये पे गे चेति (२)। षकारस्येत्त्वर्थत्वात् परदेभ्य

---

(१) एकादिश्चैकस्य चादुक् इति पाणिनिः।६।३।७६। एकादिर्नञ् प्रकृत्या स्यादेकस्य चादुगागमश्च। नञो विंशत्या समासे कृते एकशब्देन सह तृतीयेति योगविभागात् समासः। अनुनासिकविकल्पः। एकेन न विंशतिः। एकान्नविंशतिः एकाद्वविंशतिः। एकोनविंशतिरित्यर्थ इति सिद्धान्तकौमुदी।

(२) षगे चेति समासवाचकात् षगात् परश्चकारः पूर्व्वोक्तयजातीय इत्यभाव

३५५। सर्व्वैकदेशसङ्ख्यातसङ्ख्याव्यान्नैकान्नैक्येऽह्नोऽह्नः।

(सर्व्व—व्यात् ५।, न ।१।, एकात् ५।, न ।१।, ऐक्ये ७।, अह्नः ६।, अह्नः १।)।

एभ्यः परस्य अहन् इत्यस्य स्थाने अह्नः स्यात् यादौ नत्वेकात् न चैक्ये।

एभ्यः ष इत्यर्थः, तेन सखिसुत इत्यादौ न स्यात्। प्रियसख इत्यादि—प्रियश्चासौ सखा चेति, परमश्च तदहश्चेति (१) महांश्चासौ राजा चेति वाक्यम् (२)।

३५५। सर्व्वैक। सर्व्वश्च एकदेशश्च संख्या च व्यश्च तत्तस्मात्। न एको नैकस्तस्मात्, न ऐक्यं नैक्यं तस्मिन्। एभ्य इत्यादि। सर्व्वशब्दात्, एकदेशवाचिनः पूर्व्वादेः, संख्यातशब्दात्, एकशब्दभिन्नात् संख्यावाचिनो, व्यसंज्ञकाच्च परस्याहन्शब्दस्याह्नादेशः स्यात् ये षे समाहारभिन्ने गे च। पूर्व्वसूत्रात् ष इत्यस्य त्रिवि-

---

कर्म्मधारयसमासमेवानुकर्षति न तु जातीयादीत्यत आह ये षे गे च इति कार्त्तिकेयः।

(१) अह्नाहान्तानां पुंस्त्वमभिधानात्।

(२) अत्र कार्त्तिकेयः "इतीवाघासुरमुखे ससखः प्राविशद्धरिरित्यत्र सखिशब्दसमानार्थकसखशब्देन ससख इति। किंवा सखिशब्दादर्शआदित्वादप्रत्यये सख इति स इति च पृथक्पदम्। अथवा सखिशब्दात् स्वार्थे ष्णः साखः तेन सह वर्त्तमानः ससखः। एवम् आगामिवर्त्तमानाहर्युक्तायां निशि पक्षिणीत्यमरोक्तं समासान्तविधेरनित्यत्वात् सिद्धम्। किंवा आगामिवर्त्तमानाभ्याम् अहोभ्यां युक्ता इति त्रिपदतत्पुरुषादरूपम्। अथवा आगामिवर्त्तमानयोरह्नोर्युक्तं योगो यत्रेति बहुव्रीहिणा समाधानीयम्। ये तु रेफशून्यपाठं कल्पयन्ति तन्मते कर्म्मधारयसमासेनैव सिद्धमिति।

३५६। प्राग्वन्नो णोऽतोऽह्नस्य।

(प्राग्वत् ।१।, नः ६।, णः १।, अतः ५।, अह्नस्य ६।)।

सर्व्वाह्णः पूर्व्वाह्णः। एकात्तु एकाह्नः।

अत इति किं? त्रिभिरहोभिर्जातः त्र्यह्नः।

३५७। कौटग्रामात् तक्ष्णः।

(कौटग्रामात् ५।, तक्ष्णः ५।)। कौटतक्षः।

परिणामेनानुवृत्तेः षे परे इत्यर्थः, तेन प्रियपूर्व्वाह्नः सुर इत्यादौ क्तमान्तत्वात् क्वो न स्यात् (१)।

३५६। प्राग्व। प्राग्वदित्यनेन पृ: अवकुप्वन्तरेऽपीति प्राप्तं, तथाच षकार-रेफ-ऋवर्णयुक्तादन्तात् परस्याह्नस्य नो णः स्यात् अव-कवर्ग-पवर्ग-व्यवधानेऽपि सतीत्यर्थः। सर्व्वाह्ण इति—सर्व्वञ्च तदहश्चेति वाक्यम्, एवं पूर्व्वाह्णः अपराह्ण इति। अह्न इति किं? दीर्घाण्यहानि यस्यां दीर्घाह्नी शरत् (२)। एकाह्न इति—एकञ्च तदहश्चेति वाक्यम्। त्र्यह्न इति—तार्थे गः, प्रत्युदाहरणार्थमिहोक्तमिदम्। प्राग्वदिति किं? संख्याताह्नः व्यह्न इत्यादि। संख्याताह्न इति कश्चित्। नैक्ये किं? द्वयोरह्नोः समाहारः द्व्यहः। सर्व्वैकदेशादेः किं? पुण्याहम्।

३५७। कौट। आभ्यां परात्तक्ष्णः षः स्यात् यादौ।

---

(१) केचित्तु अत्र अदन्ताह्नादेशविधानं षस्य बाधकं, तेन क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति न्यायात् अह्नाह्न इत्यत्र षप्रत्ययो नाह्नादेश इति कार्त्तिकेयः।

(२) अत्र दीर्घाह्नीति स्थिते नान्तत्वादीपि न णत्वमिति।

३५८। जातमहद्वृद्धादुक्ष्णः।

(जात-महत्-वृद्धात् ५।, उक्ष्णः ५।)।

जातोक्षः, महोक्षः।

३५९। शुनोऽत्यप्राण्युपमानात्।

(शुनः ५।, अति-अप्राण्युपमानात् ५।)।

अतेः प्राणिवर्जादुपमानाच्च शुनः षः स्यात् यादौ।

आकर्ष इव श्वा आकर्षश्वः। प्राणिनस्तु व्याघ्र इव श्वा व्याघ्रश्वा।

कौटतक्ष इति—कुट्यां भवः कौटः, कौटश्चासौ तक्षा चेति वाक्यम् (१)।

३५८। जातः। एभ्यः परादुक्ष्णः षः स्यात् यादौ। जातोक्षः इति—जातश्चासौ उक्षा चेति वाक्यम्। एवं महोक्षः वृद्धोक्षः। यादौ किं? महोक्षा शिवः।

३५९। शुनो। उपमीयते यत् तदुपमानम् उपमेयमित्यर्थः। अप्राणी च तदुपमानं चेति तत्। अतिश्च अप्राण्युपमानञ्च तत् तस्मात्। आकर्षः (२) श्वेवेति उपमेयस्य व्याघ्रादेरित्यनेन यः। आकर्षो द्यूत इन्द्रिये। पाशके शारिफलके कोदण्डाभ्यासवस्तुनि। आकर्षणेऽपि पुंसि स्यादिति मेदिनी। श्वन्शब्दो व्याघ्रादौ द्रष्टव्य आकृतिगणत्वात्। यद्यपि आकर्षशब्दोऽपि

(१) कौटतक्षः [illegible]।

(२) [illegible] इति भरतः।

३६०। पूर्व्वोत्तरमृगाच्चानतेः सक्थ्नः।

(पूर्व्व-उत्तर-मृगात् ५।, च ।१।, अनतेः ५।, सक्थ्नः ५।)।

एभ्यः पूर्व्वोक्ताच्च अतिवर्ज्जात् सक्थ्नः षः स्यात् यादौ।

पूर्व्वसक्थम्।

व्याघ्रादौ वर्त्तते (१) तथापि श्वन्शब्दस्य न आकर्षशब्देन सह यः, (२) उपमेयवाचिनः उपमानवाचिभिर्व्याघ्राद्यैः सह यविधानात् (३)। इह तु उपमेयश्चाकर्षशब्दः। एवं व्याघ्रश्वेति प्रत्युदाहरणेऽपि। परे तु (४) अप्राणिनि वर्त्तमानात् उपमानवाचिनः श्वनः ष इत्याहुः। एके तु आकर्ष इव आकर्षः (५) आकर्षश्चासौ श्वा चेति आकर्षश्व इत्याहुः, सूत्रे आकर्ष इव श्वेति दर्शनात्। तस्मात उपमीयतेऽनेन इति वि अनट् (६)।

३६०। पूर्व्वो। पूर्व्वश्च उत्तरश्च मृगश्च तत्तस्मात्, न अतिः अनतिः तस्मात्। पूर्व्वोक्तादिति—अप्राण्युपमेयवाचिन इत्यर्थः। पूर्व्वसक्थमिति—पूर्व्वशब्दः सक्थ्नः पूर्व्वावयववाची, सक्थिशब्दो-

---

(१) इतेनाकर्षशब्दस्याप्युपमानत्वमायातीत्यर्थः।

(२) श्वानकुक्कुरेनाकर्षश्चोपमानं कृत्वा अत्र कर्म्मधारयो न कर्त्तव्य इत्यर्थः।

(३) उपमेयस्य व्याघ्राद्यैरित्यनेन उपमेयपदस्य पूर्व्वस्थितिः सूचितेति भावः।

(४) तुकारोऽत्र वक्तव्ये।

(५) वस्तुतः आकर्षशब्दस्यैवाकर्षतुल्यार्थ इत्यर्थः।

(६) अनेरन्तादरत्नतिरिति वक्ष्यति। तत्र "अतिक्रान्तः श्वानमतिश्वो वराहः जवेनेत्यर्थः। अतिश्वः सेवकः सुष्ठु स्वामिभक्त इत्यर्थः। अतिश्वी सेवा अतिनीचेत्यर्थः" इति काशिका ५।४।९६।

३६१। देशाद् ब्रह्मणः कुमहद्भ्यान्तु वा।

(देशात् ५।, ब्रह्मणः ५।, कु-महद्भ्यां ५॥, तु ।१।, वा ।१।)।

कुत्सितो ब्रह्मा कुब्रह्मः कुब्रह्मा।

३६२। सरोऽनोऽयोऽश्मनः संज्ञाजात्योः।

(सरस्-अनस्-अयस्-अश्मनः ५।, संज्ञा-जात्योः ७॥)।

महानसं उपानसं लोहितायसं कालायसं पिण्डाश्मः अमृताश्मः।

ऽपि तदवयववाची (१) पूर्व्वञ्च तत् सक्थि चेति वाक्यं, पूर्व्वं सक्थ्नु इति परे। एवमुत्तरसक्थमिति। फलकसक्थं—फलकं शरावरणं चर्म्म, फलकं सक्थि इवेति वाक्यम्। तत्रापि सर्व्वं पूर्व्ववदूह्यम्।

३६१। देशात्। देशो जनपदः, तद्वाचिनः परात् ब्रह्मशब्दात् षः स्यात् यादौ, वा तु कुमहद्भ्याम्। कुत्सितो ब्रह्मेति—ब्रह्मशब्दोऽत्र ब्राह्मणवाची। कुशब्दस्य ब्रह्मशब्देन सह यस इति परे। एवं महांश्चासौ ब्रह्मा चेति महाब्रह्मः महाब्रह्मा। देशात्तु अवन्तिब्रह्म इति वक्ष्यति।

२६२। सरो। सरस् अनस् अयस् अश्मन् इत्येतेभ्यः नाम्नि जातौ च षः स्यात् यादौ। महानसमिति—महच्च तत् अनश्चेति, उपगतञ्च तदनश्चेति, लोहितञ्च तत् अयश्चेति, कालञ्च तदयश्चेति, पिण्डश्चासावश्मा चेति, अमृतश्चासौ अश्मा चेति वाक्यम्। सरःशब्दस्य तु मण्डूकसरसं जालसरसमिति वक्ष्यति। एषु जालसरसमहानस-लोहितायस-पिण्डाश्माः संज्ञायाम्। मण्डूकसरसोपानस-

---

(१) सक्थि जरुः, सक्थि क्लीबे पुमानूरुरित्यमरः।

३६३। सर्व्वैकदेशसङ्ख्यातपुण्यवर्षादीर्घाद्रात्रेः।
(सर्व्व—दीर्घात् ५।, रात्रेः ५।)।
रात्रेरेकैकदेशे वर्त्तमानः पूर्व्वादिरेकदेशः।
पूर्व्वरात्रः अपररात्रः।

३६४। गोरतार्थे। (गोः ५।, अतार्थे ७।)।
गोशब्दात् पः स्यात् यादौ, नतु तार्थे। परमगवः।

कालायसाश्मतश्मा: जातौ। अनयोः किं? मत्सरः मद्राश्मा। चन्द्रसरः हैतवनसर इत्यत्र चन्द्रहैतवनशब्दौ संज्ञे न तु समुदायौ, विशेषनिष्ठसंज्ञाशब्दस्य सम्बन्धादुत्तरदस्य विशेषवृत्तेः (१)।

३६३। सर्व्व। सर्व्वशब्दादेकदेशवाचिपूर्व्वादेः संख्यात-पुण्य-वर्षा-दीर्घेभ्यश्च परस्या रात्रेः पः स्याद्यादौ। पूर्व्वरात्र इति—रात्रिशब्दोऽपि लक्षणया पूर्व्वावयवे वर्त्तते। पूर्व्वा चासौ रात्रिश्चेति वाक्यम्। पूर्व्वं रात्रेरिति परे। एवम् अपररात्रः मध्यरात्र इत्यादि। सर्व्वा चासौ रात्रिश्चेति सर्व्वरात्रः, संख्याता चासौ रात्रिश्चेति संख्यातरात्रः, पुण्या चासौ रात्रिश्चेति पुण्यरात्रः, वर्षाणां रात्रिः वर्षारात्रः, दीर्घा चासौ रात्रिश्चेति दीर्घरात्रः। परे तु वर्षादीर्घशब्दौ नाहुः। त्रिरात्रम् अतिरात्र इत्यादौ संख्याव्याद्रात्रङ्गुलिभ्यामः। यादौ किं? पुण्यरात्रि-र्हेमन्तः।

३६४। गो। यादाविति—ये पे तार्थभिन्नगे चेत्यर्थः। परम-

---

(१) संज्ञालक्षणमाह गोयीचन्द्रः—"यो योगवृत्तिमितरत्नापहाय विशेषे वर्त्तते स एव संज्ञाख्यां लभते" इति।

३६५। नावोऽर्द्धात् गे च।

(नावः ५।, अर्द्धात् ५।, गे ७, च ।१।)।

अर्द्धात् परात् नौशब्दात् षः स्यात्, अतार्थे गे च। अर्द्धनावं।

गव इति—परमश्चासौ गौश्चेति वाक्यम्। एवं पुमांश्चासौ गौश्चेति पुङ्गवः, षसां गवां समाहारः षड्गवं, राज्ञो गौः राजगवः, स्त्रियां परमगवीत्यादि। अतार्थे किं? पञ्चभिर्गोभिः क्रीतः पञ्चगुः। तार्थ इति वाच्य एव, तेन पञ्चभ्यो गोभ्य आगतः पञ्चगवरूप्य इति स्यात् (१) परसूत्रे गग्रहणज्ञापकात्।

३६५। नावो। अर्द्धनावमिति अर्द्धञ्च तत् नौश्चेति वाक्यम्, अर्द्धं नाव इति परे। एवं द्वयोर्नावोः समाहारः द्विनावं, त्रिनावम्। अतार्थे किं? पञ्चभिर्नौभिः क्रीतः पञ्चनौः। वाच्य एव निषेधात् द्वाभ्यां नौभ्यामागतः द्विनावरूप्य इति (२)।

---

(१) न्टहेतुभ्यो मयट्रूप्यौ वा। जेभ्यो न्टवाचिभ्यो हेतुवाचिभ्यश्च आगतेऽर्थे मयट् रूप्यश्च स्यादिति ढषेकादित्यादिवक्ष्यमाणसूत्रटीकायां वार्त्तिकसूत्रम्।

(२) अर्द्धात् परान्नौशब्दात् षः स्यात्, सति सम्भवे ये षे तार्थभिन्ने द्विगौ च, अयमेकोऽर्थश्चकारेणैव सङ्गतः, पुनर्गे इत्यनेन अर्थान्तरोपन्यासो यथा—नौशब्दात् षः स्यात् गे अर्थात् अतद्धितार्थे द्विगावित्यपरोऽर्थः। तत्र अर्द्धापेक्षा नास्तीति। अतार्थे इति विशेषणस्य उभयपक्षे योगः। * * * द्विगौ तु द्वयोर्नावोस्तिसृणां नावां समाहारः द्विनावं त्रिनावमिति गङ्गाधरः।

अतार्थे गे इत्यस्यानुवृत्तावपि पुनर्गग्रहणं द्विगुसमासे अर्द्धशब्दातिरिक्तपूर्व्वपदस्यापि प्राप्त्यर्थम्। तेन द्वयोर्नावोः समाहारः द्विनावम्, अत्र संख्यावाचकादपि नौशब्दात् षः। पुनर्गकारग्रहणात् यषयोर्निवृत्तिरस्तु इत्याशङ्कया चकारग्रहणं तेनैव तावनुकृष्येते। इति कार्त्तिकेयः।

२६६ । खार्य्या वा । (खार्य्याः ५।, वा ।१।) ।

अर्द्धखारं अर्द्धखारी ।

इति यः ।

तत्पुरुष समासः (षः) ।

कृष्णमाश्रितः कृष्णाश्रितः ।

---

२६६ । खार्य्याः । अर्द्धात् परस्याः खार्य्याः षः स्याद्वा ये षे तार्थभिन्नगे च । अर्द्धखारमिति—अर्द्धञ्च तत् खारी चेति वाक्यम्, अर्द्धं खार्य्या इति परे । गे द्वयोः खार्य्योः समाहारः द्विखारं द्विखारि, त्रिखारं त्रिखारि, द्वे खार्य्यौ धनमस्य द्विखारधनः इत्यादि । षाभावपक्षे द्विखारिः त्रिखारिः स्त्रियामिति न्यासः । वाशब्दस्य व्यवस्थावाचित्वात् अर्द्धखारमित्यत्र क्लीवत्वम् । अर्द्धनावः अर्द्धनावी अर्द्धनावमित्यत्र त्रिलिङ्गत्वमिति ।

इति यः ।

इदानीं षमाह कृष्णमाश्रित इत्यादि ।

द्वा आश्रिताद्यैः षः । द्वन्तस्याश्रित्याद्यै सह षः स्यात् । कृष्णाश्रित इति । एवं कष्टं श्रितः कष्टाश्रितः, वेदं विद्वान् वेदविद्वान् । विप्राय वेदविदुषे इति भारते । आश्रितादिर्यथा—

आश्रितश्रितविद्वांसोऽतीतात्यस्त(१)बुभुक्षवः ।

---

(१) लङ्घितात्यस्तः । अत्यासोऽतिक्रमः सोऽपि गतिविशेष एवेति कर्त्तरि क्त आदिकर्म्मणि क्तो गत्यर्थ्याभ्युपेय इति २।१।२४ पाणिनिसूत्रे तत्त्वबोधिनी ।

आपन्नपतितप्राप्तगमिगामिबुभुत्सवः॥

गमिन् गामिन् इत्युभयपाठात् भव्यार्थेणिन्यपि वा विरिन्त्यन्ये। औणादिक इनि गमीति परे। आकृतिगणत्वात् सुखमीप्सुः सुखेप्सुः, द्विषद्वीर्य्यनिराकरिष्णुः, हंसमण्डलद्युतिजिष्णुरित्यादि। (१)

खट्वायाः क्तेन क्षेपे। इवन्तायाः खट्वायाः क्षेपे गम्यमाने क्तान्तेन सह षः स्यात्। खट्वारूढ़ो जाल्मः (२) खट्वाप्लुतो जाल्म उत्पथप्रस्थित इत्यर्थः। न केवलं खट्वारोहणमात्रेण यस्य निन्दा सोऽभिधीयते किन्तु येन केनाप्यनुचिताचरणेन यस्य निन्दा स इति। इह वाक्ये निन्दा न गम्यते इति वाक्याभावात् नित्योऽयं सः।

सवाक्यो यः समासः स्यात् स विकल्पः सुसम्मतः।
वाक्याभावे तु नित्यं स्यादिति शब्दविदो विदुः॥

क्षेपे किं? खट्वामारूढ़ोऽध्यापकः शिष्यान् अध्यापयति।

कालानाम्। इवन्तानां कालवाचिनां क्तान्तेन सह षः स्यात्। दिनं संक्रान्ता दिनसंक्रान्ता मुहूर्त्ताः, रात्रिमारूढ़ा

---

(१) समासविधिषु लक्षणसुपलक्षणमिति न्यायात् क्रियाविशेषणस्यापि, तेन नितान्तक्षामः निकामसुखी नित्यभीरुः मन्दगामीत्यादि इत्यपि का-सि।

(२) अननुज्ञातो गुरुणा खट्वामारूढः खट्वारूढ़ो लङ्घिताचारत्वादविनीतोऽभिधीयते इति का-सि।

जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः। वेदं व्रतानि च समाप्य समावृत्तेन हि खट्वारोढ़व्या। ब्रह्मचर्य्य एव भूमिशयनार्होऽपि यः खट्वामारोहति स जाल्मः। रूढ़स्वार्थं तेन खट्वामारोहतु न वा निषिद्धानुष्ठानपरः सर्व्वोऽपि खट्वारूढ़ इत्युच्यते। इति तत्त्वबोधिनी।

रात्रयारूढ़ाः किरणाः, मासं प्रमितः (१) मासप्रमितश्चन्द्रः मासं प्रमातुमारब्धवानित्यर्थः। मासस्यैकदेशस्य प्रतिपदश्चन्द्रेण सह सम्बन्धान्नात्यन्तसंयोगः (२)।

व्याप्तावन्येश्च। अत्यन्तसंयोगे द्यन्तस्य कालवाचिनः क्तान्तेनान्यैश्च स्याद्यन्तैः सह षः स्यात्। मासौ स्थितः मासस्थितः वर्षं भोग्यः वर्षभोग्यः मुहूर्त्तं सुखं मुहूर्त्तसुखं सर्व्वरात्रकल्याणी सर्व्वरात्रशोभना। इति द्वीषः।

अथ त्रीषः।

तयाः समाद्यैः। त्यन्तस्य समाद्यैः सह षः स्यात्। पित्रा समः पितृसमः धान्येनार्थः धान्यार्थः। समादिर्यथा—

समोऽर्थो निपुणः पूर्व्व ऊनार्थं सदृशावराः।
श्लक्ष्णः कलह-सप्राद्यऽप्रादिमिश्रौ (३) मताविह॥

ऊनार्थग्रहणात् एकोनः पुण्यहीनः विकाररहित इत्यादि। प्रायो नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इति न्यायात् गुरुसदृशीत्यपि। प्राद्यप्रादिमिश्र इति—धान्यप्रमिश्रः गुड़मिश्र इत्यादि। अस्याकृतिगणत्वात् भयविह्वलः अस्त्रशून्यः प्रकटजरा (४) गमनमन्थरः वयोज्येष्ठः विरहकृशः खेदार्द्रः गुणाधिकः वन्धुविधुरः द्याङ्गविकलः गुरुतुल्या इत्यादि।

---

(१) च्यत्र मा ल् च माने इत्यस्मात् आदिकर्म्मणि कर्त्तरि क्तः।

(२) प्रतिपदश्चन्द्रेण सह सत्यपि सम्बन्धे नात्यन्तसंयोगः। एतेनात्र व्याप्तावन्यैश्चेति परसूत्रस्याविषयो दर्शित इति।

(३) कलहः प्रादिमिश्रः अप्रादिमिश्र इत्यर्थः।

(४) प्रकटेन पलितादिप्रकाशेन इत्यर्थ इति विद्यालङ्कारः।

तीक्षतगुणवचनेन। तया कृतः तीक्षतः, तीक्षतश्चासौ गुणवचनश्चेति। गुणमुक्तवान् गुणवचनः कभावेऽमीत्युक्तेर्भेऽनट्। यः पूर्व्वं गुणे वर्त्तित्वा पश्चात् द्रव्ये वर्त्तते स गुणवचनो, न तु गुणमात्राभिधायकः गुणेनेत्यकरणात्, तेन घृतेन पाटवमित्यत्र न स्यात्। त्रन्तस्य त्रन्तार्थकृतगुणवचनेन सह षः स्यात्। शङ्कुलया कृतः खण्डः शङ्कुलाखण्डः, गिरिणा कृतः काणः गिरिकाणः प्रमादेन कृतो मूर्खः प्रमादमूर्खः। खण्डकाणादयः खण्डननिमीलनादौ गुणे वर्त्तित्वा (१) पश्चात् तद्वति द्रव्ये वर्त्तन्ते। शङ्कुला शस्त्रभेदः (२) गिरिः शिशुक्रीड़नद्रव्यं (३) प्रमादोऽनवधानता। खण्डादयस्तु त्रन्तशङ्कुलादिवाच्यकृता इति। तीक्षतेति किम्? अक्ष्णा काणः, न ह्यत्र त्रन्तेन अक्ष्णा काणत्वं कृतं, किन्त्वन्येन केनापि। भागवृत्तिस्तु त्रन्तेनाक्ष्णा काणत्वकरणादक्षिकाणः स्यादेवेत्याह। गुणवचनेन किं? गोभिर्व्वपावान् (४) गोशब्देन लक्षणया गव्यमुच्यते। परभृतध्वनिमुखरः शरदन्तुरः इत्यादयस्तु षीषेण मुखरदन्तुरशब्दयोरगुणवचनत्वात्। विशेषार्थावगतिः शब्दसिद्धौ कृतमर्थावगतिनिमित्तमर्थनियमं मण्डपादिवदतिक्रामतीति तीषस्यैव वाक्यार्थव्यवस्थाघटकत्वात् इत्यन्ये (५)। समादेराकृतिगणत्वात् चीस इत्यन्यः।

---

(१) द्रव्यगुणीभूतत्वात् क्रियापि गुण इति वैयाकरणानां मतमिति गोयीचन्द्रः।

(२) यँाति इति भाषा।

(३) गिरिश्चचूरोगविशेष इति कश्चित्।

(४) वपा मेदः।

(५) ननु सम्बन्धविवक्षायां षष्ठीसमासे सति पदमात्रनिष्पत्तिर्भवति, वाक्यार्थव्यवस्था तु तृतीयासमासेनैव घटते, अत्राह प्रतीतिर्विषयमपहरतीति न्याया-

घघयोः क्तता बहुलम्। घघयोर्विहिता या क्ती तदन्तस्य क्तादन्तेन सह षो बहुलं स्यात्। नखलून: चक्रच्छिन्नः अहिहत: हरिव्रात इत्यादि। बहुलग्रहणात् गलेचोपक: पादहारक इत्यादौ क्त्यन्तरस्यापि षः (१)। दात्रेण लूनवान् परशुना छिन्नवान् इत्यादौ न स्यात्। घघयोः किं? भिक्षाभिरुषित:, अत्र हेतौ त्री।

स्तुतिनिन्दयोर्ल्यैः। स्तुतिनिन्दयोर्गम्यमानयोर्घघविहितत्रान्तस्य ल्यसंज्ञकान्तैः सह षः स्यात्। करचेतव्यानि पुष्पाणि (२) वाष्पच्छेद्यानि तृणानि (३) विश्वैरुपास्यो विश्वोपास्यः शम्भुः, शुना लेह्यः श्वलेह्यः कूपः (४)। अनयोः किं? काकेन पातव्यं जलं, मैत्रेण गम्यो ग्रामः। बहुलानुवृत्तेस्तृणोपेन्ध्यं तृनेन उपेन्ध्यं ज्वलनम् इत्यादि स्यात्, नात्र स्तुतिनिन्दावगम्यते। पूर्व्वस्यैवायं विधिः प्रपञ्च इत्यन्ये।

दर्थव्यवस्थेति। प्रतीतिरर्थविशेषावगतिः विषयम् अर्थावगतिनिमित्तं शब्दसिद्धौ कृतमन्वयनियममपहरतीति अतिक्रामतीत्यर्थः। तथाहि मण्डपशब्दादुत्पन्नार्थविशेषावगतिः मण्डं पिबतीति शब्दसिद्धौ कृतमन्वयमतिक्रामतीति समासपादे १५ सूत्रस्य टीकायां गोयीचन्द्रः।

(१) तृतीयायाविहितः समासो विभक्त्यन्तरस्यापि भवतीत्यर्थः।

(२) अत्र स्तुतिः। एवं नाम नम्राणि विश्वगुजातानि यतः करेणापि प्रचीयन्ते।

(३) अत्र निन्दा। एवं नामासारमिदं यत् वाष्पेणापि छिद्यते।

(४) निन्दात्र गम्यते। अनादेयत्वोद्भावनं निन्दा, एवमनादेयोऽयं यतः श्वभिरपि लिह्यते। अथवा अत्रापि स्तुतिः, एवं नामासन्नोदकः कूपः यतः श्वभिरपि लिह्यते।

संस्कारस्य संस्कार्य्येण। ञ्यन्तस्य संस्कारवाचिनः संस्कार्य्य-वाचिना सह षः स्यात्। दध्ना उपषिक्त ओदनः दध्योदनः, गुड़ेन मिश्रा धानाः गुड़धानाः, गुड़पूपा इत्यादि। अश्वरथः गोयानं मणिमुकुटं कुङ्कुमवस्त्रं जलगर्गरी दधिभाण्डं धान्यकुशूल इत्यादयस्तु अश्वयुक्तो रथ इति यत्ते शाकपार्थिवादित्वात् मध्यपद-लोपः। इति त्रोषः।

अथ चोषः।

च्या बल्याद्यैः। च्यन्तस्य बल्यादैः सह षः स्यात्। कुवेराय बलिः कुवेरबलिः। बल्यादिर्यथा।

बलिर्हितसुखे चैव रक्षितोऽन्ये प्रयोगतः।

आकृतिगणत्वात् वरप्रदेया कन्या, गुरुप्रदेयाधिकनिस्पृहोऽर्थी, पितृदानमित्यादि।

विकृतिः प्रकृत्या तादर्थ्ये। तादर्थ्यविहितच्यन्तस्य विकृति-वाचिनः प्रकृतिवाचिना सह षः स्यात्। यूपाय दारु यूपदारु, कुण्डलाय हिरण्यं कुण्डलहिरण्यम्। अन्यत्र रन्धनाय स्थाली अश्वाय घासः। अश्वघासः वासगृहं रन्धनस्थालीत्यादि तु पौषेण।

नित्यं प्रयोजनार्थार्थेन वाच्यलिङ्गता च। प्रयोजनवाचिना अर्थशब्देन सह च्यन्तस्य षः स्यात् नित्यं, वाच्यलिङ्गता च। ब्राह्मणार्थं पयः ब्राह्मणार्थः सूपः ब्राह्मणार्था यवागूः। वाच्य-लिङ्गताविधानात् यत्र वाच्यलिङ्गता नास्ति तत्र न स्यात्। तेन नृपाय अर्घः। मशकार्थो धूमः इत्यत्र मशकशब्देन लक्षणया

मशकनिवृत्तिरभिधीयते, अर्थशब्दस्तु प्रयोजनार्थः (१)। अत्र अप्रयोजनार्थार्थशब्दप्रयोगे चीविधानाभावेऽपि प्रयोजनार्थग्रहणं निवृत्तिरूपप्रयोजनवाच्यर्थशब्देन चीषविधानार्थमिति कश्चित्। मशकस्यार्थो निवृत्तिर्यस्मात् इति व्यधिकरणहेनेत्यन्यः। इति चीषः।

अथ पीषः।

प्या मुक्ताद्यैः। प्यन्तस्य मुक्ताद्यैः सह षः स्यात्। पापान्मुक्त पापमुक्तः। मुक्तादिर्यथा।

मुक्तो भीतिरपत्रस्तो जुगुप्सा-भीत-निर्गताः।
इतरः पतितोऽपेतो भयापोढ़ौ मताविह॥

अस्याकृतिगणत्वात् वृश्चिकभीः अधर्म्मजुगुप्सुः तदन्यः वृत्तच्युतः भास्वद्ग्रावोद्गतः वेदवहिष्कृत इत्यादि। अनभिधानात् क्वचिन्न स्यात् महाप्रासादात् पतितः महाभोजनादपत्रस्त इत्यादि। इति पीषः।

अथ षीषः।

सम्बन्धे कृता च ष्याः सदा त्वकेन क्रीड़ाजीविकयोः। सम्बन्धे कृद्योगे च विहिता या षी तदन्तस्य स्याद्यन्तैः सह षः स्यात्, क्रीड़ाजीविकयोर्विहितणकान्तेन तु नित्यम्। राज्ञः पुरुषः राजपुरुषः विप्रवस्त्रम्। गोस्वामी गवीश्वर इत्यादौ स्वामीश्वरेत्यादिना विहितत्वेऽपि सम्बन्धे ष्येव, सम्बन्धषीबाधकसीविधाने ष्यप्राप्तौ चकारेण तदनुकर्षणात्। कृद्योगे यथा,

---

(१) मशकनिवृत्तिप्रयोजनको धूम इत्यर्थः।

एधसो व्रश्चनः एधोव्रश्चनः, पलाशानां शातनं पलाशशातनम् इत्यादि। क्रीड़ायां—पुष्पभञ्जिका, मदनभञ्जिका, पुष्पप्रचायिका। जीविकायां—दन्तलेखकः, नखलेखकः, चित्रलेखकः; नित्यसमासत्वाद्वाक्याभावः (१)। क्रीड़ाजीविकयोर्ण्वको वक्तव्यः। क्रीड़ाजीविकयोरिति किम्? ओदनस्य भोजकः।

न निर्द्धारणे सड्डार्थक्तेन च। निर्द्धारणे वर्त्तमानङयोर्विहितक्तेन योगे च विहिता या षष्ठी तदन्तानां षष्ठी न स्यात्। नराणां क्षत्रियः शूरतमः, गवां कृष्णा क्षीरिणी, अध्वगानां धावन्तः शीघ्रतमाः,(२) राज्ञां ज्ञातः, नराणां पूजितः। "कलहं स राममहितः कृतवा"निति तु अतीतक्तान्तेन षष्ठ्याः स्यात्, सम्बन्धष्ठ्याः सासा (३)। इदमेषामुपगतम् (४)।

---

(१) पुष्पभञ्जिकादिष्विति शेषः।

(२) "कथं तर्हि पुरुषोत्तम इति? यस्मान्निर्द्धार्य्यते, यश्चैकदेशो निर्द्धार्य्यते, यश्च निर्द्धारणे हेतुस्तत्त्रितयसन्निधौ सत्येवायं निषेध इति "द्विवचनविभज्येति" सूत्रे कैयटः। यद्वा पुरुषेषूत्तम इति निर्द्धारणसप्तम्याः "संज्ञाया"मिति समासः। न चैवं "न निर्द्धारण" इति व्यर्थम्। स्वरे भेदात्। सप्तमीसमासे हि पूर्व्वपदप्रकृतिस्वरः। षष्ठीसमासे तु अन्तोदात्तत्वं स्यात्" इति प्रौढ़मनोरमा। "* * * तन्मन्दं, "संज्ञाया"मिति समासस्य नित्यत्वेन स्वपदविग्रहासङ्गतिप्रसङ्गात्। तस्मात् कैयटोक्तसमाधानमेव समीचीनमिति नव्याः"—इति तत्त्वबोधिनी। "अत्र निर्द्धारणे सप्तमीसमासोऽपि न स्यात्, निर्द्धारणे षष्ठीसप्तम्योरर्थतोऽभेदात्, षष्ठीसमासनिषेधवैफल्याच्च। न च गवामित्यादिवाक्यस्थितिरेव फलमिति वाच्यम्। समासविकल्पत्वादेव तत्सिद्धेः—इति प्रयोगरत्नमालाटीका।

(३) रामेण महित इति कर्त्तृविहिततृतीयया [illegible] रामस्य महित इति सम्बन्धे षष्ठी।

(४) क्ताधिकरणे क्तः।

ढवप्राप्तौ ढे । ढे षे च ष्याः प्राप्तौ सत्यां ढे या षौ तदन्तस्य षो न स्यात् । गवां दोहो गोपालकेन, समुद्रस्य बन्धो वानरैः । उभयप्राप्तौ ढे इत्यनेन यत्र नियमः (१) तत्रैवायं निषेधस्तेन इक्षुभक्षिका विप्रस्य, अर्थेहा दरिद्रस्य इत्यत्र ष्याः षः स्यात् (२) । ओदनपाकः सूपकारस्य इत्यत्र तु ओदनस्येति सम्बन्धविवक्षायां षौ, ततोऽनेन न निषेधः ।

तृणकाभ्यामहोत्रादिभ्याम् । होत्रादिभिन्नाभ्यां तृनन्तणकान्ताभ्यां सह ष्यन्तस्य षो न स्यात् । पुरां भेत्ता, अपां स्रष्टा, ओदनस्य भोजकः, तण्डुलस्य पाचकः । अहोत्रादिभ्यां किं ? हविर्होता गवीभर्त्ता । पत्यर्थभर्त्तृग्रहणात् वज्रस्य भर्त्ता धारक इत्यत्र निषेधः । क्षत्रिययाजकः देवपूजक इत्यादि ।

होत्रादिर्यथा—

होता पत्यर्थ-भर्त्ता च हन्ता याजकपूजकौ ।
गणको रथपङ्क्तिभ्यां (३) स्नापकः परिचारकः ।
उत्सादकोद्वर्त्तकाध्यापकाश्च परिवेषकः (४) ।
प्रयोजक इमे प्रोक्ताः शेषं ज्ञेयं प्रयोगतः ॥

रथपंक्तिभ्यां परस्य गणकस्यैवेह पाठात् ग्रहाणां गणक इत्यत्र

(१) कर्त्तरिविहितक्तप्रयोगे टवे तृतीयैवेति भेदः ।

(२) भक्षिकादीनां स्त्रीविहितकप्रत्ययान्तत्वात् पूर्वोक्तनियमाभावे षष्ठीसमासः स्यादेवेति भावः ।

(३) काशिकायां सिद्धान्तकौमुद्यां तृजन्तप्रबोधे च पङ्क्तिरित्यत्र पत्तिरिति पाठो दृश्यते ।

(४) काशिकाकारे कृदन्तप्रबोधे च परिवेषक इत्यत्र तात्स्थ्यकारो दृश्यते ।

षप्रतिषेधः। आकृतिगणत्वात् चित्तग्राहकः सम्प्रदानबोधक इत्यादि। तृन्साहचर्य्यात् षविहितणकान्तस्यैवेह ग्रहणं, तेन तमोभेदिका चन्द्रस्येत्यादौ षः स्यात् भावविहितत्वात्।

व्यक्तच्छतानपूरणैः। व्यसंज्ञकक्तदन्तेन, शतृशानाभ्यां, पूरणत्यान्तेन च सह ष्यन्तस्य षो न स्यात्। ब्राह्मणस्य कृत्वा, विप्रस्य प्रकृत्य, देवस्य कुर्व्वन्, ब्राह्मणस्य कुर्व्वाणः, सर्व्वत्र सम्बन्धविवक्षायां षो। विप्राणां दशमः, छात्राणां पञ्चमः (१)। एभिः किं? त्वदुपरि, मदुपरि। तथाच—"यत्कृतेऽरीन् व्यग्टह्णीम समुद्रमतराम चे"ति भट्टिः। यस्याः कृते इति वाक्यम्।

द्रव्यात्मगुणैः। ये गुणा गुणे गुणिनि च वर्त्तन्ते ते द्रव्यात्मगुणाः, तैः सह ष्यन्तस्य षो न स्यात्। पटस्य शुक्लः जलस्य शीतमित्यादि। यदुक्तं—

कदाचिन्न प्रयोगोऽस्ति गोशुक्लोगुण इत्ययम्।
तेनैवमादिषु प्राप्तः समासोऽयं निषिध्यते इति (२)॥

इह वैशेषिकशास्त्रीयाणां संख्यासुखदुःखादीनां न ग्रहणं, तेन गोशतं मत्सुखं त्वद्दुःखमित्यादि। यदुक्तं—

वैशेषिकगुणा नेह संख्यादुःखसुखादयः।
ग्टहीता गोशतं सीतादुःखमित्यादिदर्शनात्॥

---

(१) कथं तर्हि "तान्युच्छषष्ठाङ्कितसैकतानी"ति? प्रमाद एवायमित्येके। वस्तुतस्तु उञ्छेषु षष्ठ उञ्छात्मकः षष्ठ इति वा व्याख्येयमिति प्रौढ़मनोरमा।

(२) जयादित्यकारिकेयम्।

द्रव्यात्मेति किं ? चन्दनगन्धः, कन्यारूपं, नदीघोषः, फलरसः, करस्पर्श इत्यादि, गन्धादिशब्दानां केवलगुणस्थत्वात् ।

यदुक्तं —

न कदाचित् प्रयोगोऽस्ति चन्दनं गन्ध इत्ययम् ।
चन्दनस्यैव गन्धो हि स्वप्रधानं प्रतीयते (१) ।
एवं रूपादयस्तस्मात् समासो न विहन्यते ॥ इति ।

पटशौक्ल्यं अर्थगौरवं वचनकौशलं गात्रमार्दवमित्यादौ भावत्वान्तानां केवलगुणवृत्तित्वात् षः स्यादेव । तथाच—

यथा गन्धादयः शब्दा गुणमात्रव्यवस्थिताः ।
तथा शौक्ल्यादयस्तेन पटशौक्ल्यादयः स्मृताः ॥ इति भागुरिः ।

अन्ये तु भावत्वान्तेनापि कार्ष्ण्यादिना निषेधस्तेन काकस्य कार्ष्ण्यं, बलाकायाः शौक्ल्यमित्यत्र निषेधः, अर्थगौरवमित्यादौ तु स्यादेवेत्याहुः । एवं (२) पुरुषोत्तमदेवेनाप्युक्तं, न्यासकारादिभिस्तु नोक्तमिति ।

समानाधिकरणैः । समानाधिकरणैः षन्तैः सह स्याद्यन्तस्य षो न स्यात् । सुन्दरस्य देवदत्तस्य धनम्, रूढस्य राज्ञो मातङ्गाः ।

---

(१) भट्टकारिकेयम् । रामानन्दोऽप्येवमाह, यथा—तत्स्थैर्गुणैः षष्ठी समस्यते । तत्स्थैः केवलगुणस्थैर्गुणवाचकैर्गन्धादिभिः सह षष्ठ्यन्तस्य तत्पुरुषो भवतीत्यर्थः । यथा—चन्दनगन्धः हिमस्पर्शः फलरस इत्यादि । गन्धादयो गुण एव वर्त्तन्ते न कदाचिद्गुणिनीत्यादि ।

(२) एवमित्यनेन काकस्य कार्ष्ण्यमित्यादिकं दर्शितमिति । काशिकायां सिद्धान्तकौमुद्याञ्च एवमेव । "अनित्योऽयं गुणेन निषेधः । 'तदशिष्यं संज्ञाप्रमाणत्वात्' इत्यादिनिर्देशात् । तेनार्थगौरवं बुद्धिमान्द्यमित्यादि सिद्धम्" इति सिद्धान्तकौमुदी ।

समानाधिकरणैः किं ? राजश्रियो गौरवं, कृष्णाचरणौ वन्द्यौ। घृतस्य तीव्रो गन्धः, चन्दनस्य मृदुर्गन्धः इत्यादौ त्वन्वयाभावान्न स्यात् (१)। इति षीषः।

अथ सीषः।

स्याः शौण्डाद्यैः। स्यन्तस्य शौण्डाद्यैः सह षः स्यात्। अक्षेषु शौण्डः अक्षशौण्डः। शौण्डशब्दः सुरापे रूढ़ः, इह तूपचारात् अक्षधूर्त्त इत्यभिधीयते। नन्वऽक्षेष्विति क्रियाभावादधिकरणत्वाभावादेव कथं सी इति चेत् सत्यं, प्रसक्तिक्रियायां वृत्ता(२)वन्तर्भावाद्विषयसी। शौण्डादिर्यथा—

शौण्ड कितव संवीत प्रवीण व्याड़ पण्डिताः।
सिद्ध साहसिको दक्षश्चतुरो निपुणः पटुः।
कुशलश्चपलो धूर्त्तः शुष्कपक्वावधीत्यपि।
मध्यार्थान्तस्तथा बन्धः परे शिष्टप्रयोगतः॥

अधिशब्दस्याधेयप्राधान्येऽत्र पाठः। यथा ब्राह्मणेष्वधि ब्राह्मणाधीनः, परेष्वधि पराधीनः, अध्युत्तरदात् सदैव ईनः केवलाधिप्रयोगाभावात्। मध्यार्थस्यान्तःशब्दस्याधिकरणप्राधान्ये पाठः। यथा वनान्तर्वसति, वनमध्ये वसतीत्यर्थः। अधिकरणप्राधान्येऽधिशब्दस्य पूर्व्वपदार्थप्राधान्येऽन्तःशब्दस्य तु व-सः। यथा अधिस्त्रि अन्तर्वणमिति (३)। आकृतिगणोऽयम्।

---

(१) अत्र गन्धादिना घृतादेः साक्षात् सम्बन्धो न तु तीव्रादिनेत्यसमासः।

(२) वृत्तौ समासे इत्यर्थः।

(३) अन्तर्व्वणं वनमध्यवर्त्ती वनव्यतिरिक्तो मध्यभाग उच्यते। तत्पुरुषे तु वनमेव मध्यभूतमित्यर्थः—इति गोयीचन्द्रः।

ण्येन नियमे। ण्य-संज्ञक-यकारत्यान्तेन सह स्यन्तस्य पः स्यात् अवश्यकरणीयत्वे गम्यमाने सति। मासे एव देयमृणं मासदेयं, मासे समाप्ते सति ऋणम् अवश्यं दातव्यमित्यर्थः। एवं वर्षदेयमृणं, पूर्व्वाह्णगेयं साम, मासकरणीयम्। जन्मकृतमित्यादौ तु शौण्डादेराकृतिगणत्वात्। येनेति किं? पर्व्वणि स्नातव्यम्।

तत्राहोरात्रावयवानां क्तेन क्षेपे च। तत्रेत्यस्य, दिनावयवरात्र्यवयववाचिनश्च स्यन्तस्य क्तान्तेन सह पः स्यात्, निन्दायाञ्च। तत्र कृतं तत्रकृतं, तस्येदं तात्रकृतम्, आद्यचो ञिः। मध्याह्नगतः, पूर्व्वरात्रकृतः, अपररात्रकृतः। अवयवेति किम्? अह्नि कृतं, रात्रौ कृतम्। "दिनकृताः सिध्येयुः रात्रिवृत्तमावेदयत" इत्यादि धघयोः कृता बहुलमित्यनेन त्रौसात्। निन्दायां—प्रवाहे मूत्रितं प्रवाहमूत्रितं, (१) भस्मनि हुतं भस्महुतम्, उदकविशीर्णम् (२), अन्धकारनटितमित्यादि। प्रवाहादिना मूत्रितादिना च मुख्यार्थमपहायार्थान्तरमभिधीयते, तथाहि प्रवाहइव अनादेये कार्य्ये, मूत्रितमिव निष्फलं प्रवर्त्तनमित्युभयोरेव मुख्यार्थत्यागात् निन्दा गम्यते (३) इत्यादिक्रमेणार्थो बोद्धव्यः।

---

(१) यथा स्रोतसि मूत्रिते न किञ्चिदवशिष्यते तथेत्यर्थं इति प्रयोगरत्नमालाटीका।

(२) विशीर्णं गलितमित्यर्थः। • • • जलान्तरितत्वात् केनापि विशेषतो न ज्ञातमतो निष्फलत्वमिति निन्दा—इति प्रयोगरत्नमालाटीका।

(३) एवंविधा हि शब्दा मुख्यार्थे प्रयुज्यमाना न क्षेपं गमयन्ति, नापि पूजां, अतएव सिंहादयः शब्दाः ये पूजायां प्रवर्त्तन्ते, काकादयोऽपि ये कुत्सायां, तेऽपि गौण्या वृत्त्या। अन्यथा पूजाक्षेपयोरनभिगम इति समासपादे ४२ सूत्रस्य टीकायां गोयीचन्द्रः।

ध्वाङ्क्षार्थेन । ध्वाङ्क्षार्थेन सह स्यन्तस्य षः स्यात् निन्दायाम् । तीर्थध्वाङ्क्षः (१) तीर्थे ध्वाङ्क्ष इव स्थित इत्यर्थः । एवं तीर्थकाकः, नगरवायस इत्यादि ।

पात्रेसमितादयः । क्षेपे गम्यमाने पात्रेसमितादयः षीषे निपात्यन्ते । पात्रे (२) एव समिताः सङ्गता न पुनः क्वचित् कार्य्ये पात्रेसमिताः, आखनिके (३) खाते वक इव आखनिकवकः, वको यथा खातगतमेव भक्षयति तद्वत् यो गृहगतमेव भक्षयति नान्यत्र गच्छति सः । मातरिपुरुषः प्रतिषिद्धसेवीत्यर्थः (४) । उडुम्बरे मशका इव एकस्था उडुम्बरमशकाः, यथा उडुम्बरमध्ये मशकाः एकस्था एव नान्यत् पश्यन्ति तथा ये अदृष्टदेशान्तरास्ते इत्यर्थः । पिण्डमेव शूरः पिण्डीशूरः अन्यकार्य्याक्षम इत्यर्थः । एवं गेहेविजितीत्यादावपि निन्दा गम्यते ।

पात्रेसमिता आखनिकवको मातरिपुरुष उडुम्बरमशकाः ।

पिण्डीशूरो गृ[illegible]

गेहेदाही गे[illegible]

---

(१) ध्वाङ्क्षः का[illegible]
शब्दानां ध्वाङ्क्षादिश[illegible]
न चिरं स्थाता तद्व[illegible]
ध्वाङ्क्ष इत्युच्यते, का[illegible]
टीकायां गोयीचन्द्रः ।

(२) भोजनसम[illegible]

(३) आङ्पूर्व्वात्[illegible]

(४) प्रतिषिद्ध[illegible]
पुरुषत्वं निषिद्धं तद्व[illegible]

गोष्ठेपण्डित गोष्ठेशूरो गेहेच्छेड़ी गेहेव्याड़ः ।
उडुम्बरकृमिः पात्रेबहुलाः कूपकच्छपः ।
कर्णेचुरचुराश्चैव कूपमण्डूक इत्यपि ।
कर्णेटिरटिरा गेहेप्रगल्भोऽन्ये प्रयोगतः ॥

येषां गणे व्यान्तता तेषां प्रयोगेऽपि व्यान्तता। तथा च हतस्त्वं पात्रेसमितैरिति भट्टिः। पात्रेसमितादीनां ह्यतिरिक्तमान्तरं न भवतीत्येतदपि ज्ञेयं, तेन परमाः पात्रेसमिता इत्यादौ न षः। बहुपात्रेसमिता इत्यादौ हः स्यादेव ।

वनेकशेरुकाद्या नाम्नि। वनेकशेरुकाद्याः षोऽपि निपात्यन्ते संज्ञायाम्। वनेकशेरुकाः वनेकिंशुकाः पुरुषोत्तमः नगाधिराज इत्यादि। वनेकशेरुकादीनां पात्रेसमिताद्यन्तर्गतत्वे सिद्धे पृथग्विधानमनिन्दार्थम्। पुरुषोत्तमः नगाधिराज इत्यत्र न निर्द्धारणे इति निषेधे प्राप्ते वनेकशेरुकादिपाठात् संज्ञायां ष इत्यन्ये। परे तु संज्ञायामिति सूत्रयित्वा वनेकिंशुकाः वनेकशेरुका इत्युदाहरन्ति। ते तु यत्र समुदाये निर्द्धार्य्यमाणो निर्द्धारणहेतुश्चेति द्वयं तत्रैव न निर्द्धारणे इति निषेधस्तेन पुरुषोत्तम इत्यादौ न निषेध इत्याहुः। यद्यपि ह्रादित्त्यन्तपूर्व्वदानामेव ग्रन्थकृता ष उक्तस्तथापि प्रान्तपूर्व्वदानामप्यभिधानाज्ज्ञेयमिति। तथा च।

नञः। नञिति व्यस्य स्याद्यन्तेन सह षः स्यात् (१)। न

---

(१) स्वन्तेन सह नञ्तत्पुरुषसंज्ञकः समासो वा भवति। स च स्वभावादुत्तरपदार्थप्रधान इति संक्षिप्तसारे (समासपादे ३म सूत्रम्) तत्र गोयीचन्द्रः—"एवमनेकमित्यत्रैकवचनमुत्तरपदार्थप्रधानत्वे सिध्यति, तथाह्यत्र भ्रमवशात्

ब्राह्मणोऽब्राह्मणः। नञोऽर्थौ हि द्विविधः पर्य्युदासः प्रसज्यप्रतिषेधश्चेति। यदुक्तम्—

प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता।
पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥
अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्॥ इति।

अब्राह्मण (१) इत्यादौ परपदार्थसदृशार्थकत्वात् विधेः प्राधान्यं, प्रतिषेधांशे तात्पर्य्याभावात् प्रतिषेधस्याप्राधान्यम्, अतएव पर्य्युदासनञः परदेन सह परस्परसापेक्षत्वात् सः। किञ्चित् न कुर्व्वाण इत्यादौ विध्यंशे, तात्पर्य्याभावात् विधेरप्राधान्यं, प्रतिषेधांशे शब्दप्रयोगात् तस्य प्राधान्यम्, अतएवोत्तरदेन सह प्रसज्यप्रतिषेधनञः करोत्यर्थक्रियया सह सम्बन्धेन परस्परसापेक्षत्वाभावान्न

द्वित्वादावर्थे एकत्वस्यारोपितस्याभिधाता एकशब्द उपात्तसंख्य एव द्वित्वादीन् अभिदधातीति एकवचनमुपपद्यते। अनेकशब्दस्य सामानाधिकरण्यादप्येकवचनमेव नियतम्। यथा—"अनेकः प्राकृतः करेणुः प्रस्थितानेका" इति। अनेके अनेकेषामिति बहुवचनमपि कैश्चित् समाधीयते। किन्तु तद्भर्त्तृहरिणा न व्यवस्थितमिति वृत्तिकृता नाङ्गीकृतं, यतो "भवन्त्यनेके जलधेरिवोर्म्मयः" इत्यपपाठ इति वृत्तिकृतोक्तम्। यदा तु विजातीयानामर्थानां प्रत्येकमनेकत्वं विवक्ष्यते, तदा अनेकस्यैवानेकत्वे द्विवचनबहुवचने अपि भवतः। धवश्च खदिरश्च उभावनेकौ, धवश्च खदिरश्च पलाशश्च प्रत्येकतया इमे अनेके धवखदिरपलाशा इत्यत्रानेकशब्दप्रयोगो नास्त्येव, अनेकत्वस्य द्वन्द्वादेवाधिगतेः। अनेकैराचार्य्यैः खण्डशः प्रणीतं शास्त्रमित्येकत्ववृत्तेरेकस्य न विद्यते एकत्वं येष्विति वाक्ये बहुव्रीहिः कार्य्य" इति।

(१) एवञ्च सादृश्येन क्षत्रियादौ ब्राह्मणभ्रमः सम्भवति, स एव गौणब्राह्मणशब्दार्थोऽब्राह्मण उच्यते इत्यर्थ इति विद्यालङ्कारः।

सः। नन्वेवं सति सूर्य्यं न पश्यन्ति इत्यर्थे असूर्य्यम्पश्यानि मुखानि, पुनर्न गीयन्ते अपुनर्गेयाः श्लोकाः, श्राद्धं न भुङ्क्ते अश्राद्धभोजी ब्राह्मण इत्यादौ कथं स इति चेत् सत्यं, न हि क्रियया सह सम्बन्धः समासनिषेधकारणं, किन्तु अगमकत्वं ; तथाहि किञ्चिन्न कुर्व्वाण इत्यादावगमकत्वान्न स इति। असूर्य्यंपश्यानीत्यादौ गमकत्वात् सः, यद्वा असूर्य्यंपश्यानि मुखानि सूर्य्यविषयकदर्शनवद्भिन्नानि मुखानि, भैतत्कर्त्तृकपुनर्गेयभिन्नाः श्लोकाः, श्राद्धकर्म्मकभोजनवद्भिन्नो ब्राह्मण इत्यर्थात् पर्य्युदास एवेति (१)। देवदत्तेन न भूयते, न स्नीयते इत्यादौ क्रियया सह सम्बन्धात् प्रसज्यप्रतिषेध इति दिक्।

प्राच्चस्तु नञोऽर्थः षड्विधः। यदुक्तम्—

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥

यथा अब्राह्मणः, अपापम्, अघटः पटः, अनुदरी कन्या,

---

(१) "अश्रुत्वा भवता नाथ मुहूर्त्तमपि सा पुरा"—इत्यत्र अश्रुत्वेति प्रसज्यप्रतिषेधार्थ-नञ स्तत्पुरुषसमासो विधेयाविमर्षदोषघटकतया न युक्त इत्युपक्रम्य तत्र दर्पणकारेणोक्तं—"ननु अश्राद्धभोजी ब्राह्मणः असूर्य्यम्पश्या राजदारा इत्यादिवत् अश्रुत्वेत्यत्रापि प्रसज्यप्रतिषेधो भविष्यतीति चेन्न, अत्रापि यदि भोजनादिरूपक्रियांशेन नञः सम्बन्धः स्यात् तदैव तत्र प्रसज्यप्रतिषेधत्वं वक्तुं शक्यम्। न च तथा, विशेष्यतया प्रधानेन तद्भोज्यर्थेन कर्त्त्रंशेनैव नञः सम्बन्धात्।

यदाहुः—

श्राद्धभोजनशीलो हि यतः कर्त्ता प्रतीयते।
न तद्भोजनमात्रं तु कर्त्तरीनेर्विधानतः॥ इति।

अश्रुत्वेत्यत्र तु क्रिययैव सह सम्बन्ध इति दोष एव।"

अकेशी वेश्या, असुर इत्याहुः । असितम् इत्यादौ रूढ़िविषयत्वात् न सादृश्याद्यवगमः । केचित्तु नञ्सं येऽन्तर्भावयन्ति, तन्मते उच्चै-र्मुख इत्यादिवत् विशेषणविशेष्यत्वमवगन्तव्यम् । न नीलोऽनील इत्यादौ नञो द्योतकत्वादप्राधान्येन विशेषणत्वात् न पूर्व्व-निपातानियम इति । अन्ये तु तदसदेवेत्याहुः (१) ।

ईषतो गुणवचनैः (२) । गुणमुक्त्वा गुणिनि वर्त्तन्ते ये ते गुण-वचनास्तैः सह ईषदिति व्यस्य षः स्यात् । ईषत्पिङ्गलस्तस्या-पत्यं ऐषत्पिङ्गलिः । एवं ईषद्विकटः ईषत्पीतः ईषदुन्नत (३)

---

(१) अत्र गोयीचन्द्रः—नञ्समासं कालापाः कर्म्मधारयसमासेऽन्तर्भावयन्ति । तदसत्, उभयगतविशेषणविशेष्यभावस्याप्रसिद्धत्वात् । अनीलमित्यत्र विशेषण-विशेष्यभावस्यानियतत्वात् पूर्व्वनिपातानियमः स्यादिति ।

अत्र कार्त्तिकेयः—ब्राह्मणस्य न (सदृशः), सुरस्य न (विरोधी), राज्ञो न (भेदाश्रयः) इत्यादिवाक्यमङ्गीकृत्य अब्राह्मणः असुरः अराज इत्यादौ तत्पुरुष एव वाच्यः । यदा ब्राह्मणपदेन अप्रशस्तब्राह्मण उच्यते तदा नञः प्राशस्त्या-भाववद्यर्थकतया कर्म्मधारय एव इति ध्येयमिति केषाञ्चिन्मतम् । वस्तुतो-ऽब्राह्मणपदेन ब्राह्मणसदृशः ब्राह्मणाभावः, ब्राह्मणादन्य इत्यादयः षट् लभ्यन्ते । तत्र यदा अब्राह्मणपदेन ब्राह्मणसदृशः कथ्यते तदा ब्राह्मणपदेन लक्षणया ब्राह्मणसदृश उच्यते, नञ्पदन्तु तमेवार्थं द्योतयति, नान्यमर्थं, तेन द्वयोरेकार्थता, अतएव कर्म्मधारयः स्वीक्रियते । यदा नञोऽर्थः सदृशः, ब्राह्मणस्य मुख्यार्थः तदैव द्वयोरर्थभेदेनैकार्थताभावात् तत्पुरुष एव कथ्यते । मतमेतद्द्वयं शिष्टैरङ्गीकृत-मेव । * * * किमर्थो तदसदित्युक्त्वा कर्म्मधारयवादिमतं यत् सांक्षिप्तसारिकैः प्रत्याख्यातं तत्कथमिदानीं मया न बुद्धमिति ।

(२) वचनग्रहणात् गतभुक्तपीतादयः क्रियाशब्दा अत्र गृह्यन्ते इति विद्यालङ्कारः ।

(३) ईषदुन्नत इति दैर्घ्यादिरूपपरिमाणार्थत्वेन गुणार्थक इति विद्या-लङ्कारः ।

इत्यादि। ईषद्गार्ग्य इत्यत्र गार्ग्यद्रव्याश्रित-गुणक्रिययोरल्पत्व-बोधकत्वेऽपि ईषतो गार्ग्यशब्देन सह न षो द्रव्यवाचित्वात् (१)।

पूर्व्वादेरंशिनैकत्वे। एकत्वे वर्त्तमानेनांशिना सह पूर्व्वादेः षः स्यात्। पूर्व्वं कायस्य पूर्व्वकायः अपरकायः उत्तरकायः पूर्व्वाह्नः मध्याह्नः सायाह्नः पश्चिमरात्रः। "उपारताः पश्चिमरात्रगोचरा"इति भारविः। यद्यप्येकदेशे समुदायोपचारात् विशेषणविशेष्ययोः षेणैव पूर्व्वकाय इति सिध्यति तथाप्यवयवावयविसम्बन्धषष्ठ्याः षे कायपूर्व्व इत्याद्यनिष्टरूपनिरासार्थमिदम्। षोषेऽपि राजदन्तादित्वात् परनिपात इति कश्चित्, तन्मते तु नेदं सूत्रमिति। एकत्वे किं? पूर्व्वं छात्राणां, पूर्व्वं वर्षाणाम्। पूर्व्ववर्षा इति तु वर्षाख्यस्यांशिन एकत्वात् (२)।

क्लीवार्द्धं तुर्य्य द्वितीय तृतीय चतुर्थ तुरीयाणां वा। क्लीवलिङ्गानामेषामेकत्वे वर्त्तमानेनांशिना सह षः स्याद्वा। अर्द्धं कायस्य अर्द्धकायः (३), तुर्य्यभिक्षा द्वितीयभिक्षा तृतीयभिक्षा

---

(१) गार्ग्यशब्दस्येति शेषः। अत्र गोयीचन्द्रः—"गुणवचनेनेति किम्? ईषद्गार्ग्यः, अयं जातिशब्दो द्रव्यवचनः गार्ग्यद्रव्याश्रितगुणक्रिययोः स्तोकतां गमयितुं शब्दः प्रयुज्यते, यथा गोतर इति जातावुत्कर्षाभावात् तदवच्छेदकस्य द्रव्यस्य गुणस्य प्रकर्षं गमयितुं प्रकर्षप्रत्ययः"।

(२) "अत्र यद्यपि ङस् नास्ति, तथापि एकत्वन्तु विद्यत एव। तथाचोक्तम्—आपो दाराः वर्षाः सिकता जलौकस इत्यादेरबहुत्वेऽपि बहुवचन"मिति गोयीचन्द्रः।

(३) अर्द्धं नपुंसकमिति पाणिनिसूत्रम् (२।२।२)। "समप्रविभागे अर्द्धशब्दो नपुंसकमाविष्टलिङ्गस्तस्येदं ग्रहणम्। अर्द्धमित्येतन्नपुंसकमेकदेशिनैकाधिकरणेन समस्यते, तत्पुरुषश्च समासो भवति। षष्ठीसमासापवादोऽयं योग"—इति काशिका। भाष्ये तु—"कथमर्द्धपिप्पलीति? समानाधिकरणो भविष्यति।

चतुर्थभिक्षा तुरीयभिक्षा। पक्षे कायार्द्धम्। तथाच "अपूपार्द्धं भक्षितं मये"ति भाष्यम्। एवं भिक्षातुर्य्यमित्यादि। एकत्वे किम्? अर्द्धं धान्यानाम्। अर्द्धपिप्पल्य इति तु अर्द्धपिप्पली च अर्द्धपिप्पली च अर्द्धपिप्पली च इति एकशेषात्। अस्यानित्य-

---

अर्द्धं च सा पिप्पली च अर्द्धपिप्पलीति। न सिध्यति। परत्वात् षष्ठीसमासः प्राप्नोति। अथ पुनरयमेकदेशिसमास आरभ्यमाणः षष्ठीसमासं बाधते। दृश्यते च षष्ठीसमासोऽपि। तद्यथा—अपूपार्द्धं मया भक्षितं, ग्रामार्द्धं मया लब्धमिति। एवं पिप्पल्यर्द्धमित्यपि भवितव्यम्" इत्युक्त्वा पाणिनिसूत्रमिदं प्रत्याख्यातम्। "सुनिश्चयाच्च भाष्यकारः प्रमाणतरमधिकलक्ष्यदर्शित्वात्"—इति कैयटः। "एतत् सूत्रं 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयो'रिति सूत्रे भाष्ये प्रत्याख्यातम्। तथाहि—अर्द्ध-पिप्पलीति कर्म्मधारयेण सिद्धम्। समुदाये दृष्टाः शब्दाः अवयवेऽपि वर्त्तन्ते इति न्यायात्। समप्रविभागादन्यत्र हि तत्राप्येषैव गतिः। अर्द्धाहारः, अर्द्धजरतीयम्, अर्द्धवैशसम्, अर्द्धोक्तम्, अर्द्धविलोकितमित्यादिदर्शनात्। न च समप्रविभागे षष्ठीसमासं बाधितुं सूत्रमिदमिति वाच्यम्। षष्ठीसमासस्यापि दृष्टत्वात्। तथाच कालिदासः प्रायुङ्क्त—प्रेम्णा शरीरार्द्धहरां हरस्येति"—इति प्रौढ़मनोरमा। तत्त्वबोधिन्यामप्येवमेव। संक्षिप्तसारेऽपि नपुंसकार्द्धेन सह पाक्षिकसमास उक्तः (समासपादे ५ सूत्रम्)। अतएव तर्कवागीशेन भाष्यकारक्रमदीश्वरयोर्मतमनुसृतम्। "एवं सति पुंलिङ्गेनाप्यर्द्धशब्देन अर्द्धग्राम इति स्यात्। नायं विरोधः, तस्यापीष्टत्वात्, यतो भाष्यकारेण अर्द्धं नपुंसकमिति पाणिनिलक्षणमेव निरस्तम्। तस्मादिहापि नपुंसकार्द्धेति कृतं स्पष्टार्थम्। अग्रभोजनं भोजनाग्रमित्यादिसिद्धार्थम् अग्रशब्दोऽप्यन्यैरत्र पठ्यते, तत्कर्म्मधारय-षष्ठीसमासाभ्यामेव साधनीयम्। अर्द्धस्रोतः, अर्द्धदृष्टा, अर्द्धजरतीयसाकल्यदृत्तेरप्यर्द्धस्य तृतीयासमासः। ध्रुवमनयोरर्द्धेन वैशसं भवतीति वाक्येऽपि तत्प्रयोगो दृश्यते"—इति गोयीचन्द्रः। विधिना कृतमर्द्धवैशसमिति कुमारे ४।३१; प्रेम्णा शरीरार्द्धहरां हरस्येति च कुमारे १।५०; मल्लिनाथेन तु "अर्द्धं हरतीति अर्द्धहरा, शरीरस्यार्द्धहरां शरीरार्द्धहराम्। कुलधुरन्धरादिवत् अवयवहारा समुदायविशेषकत्वात् समासः, अन्यथा त्वर्द्धस्य समप्रविभागवचनत्वात् अर्द्धशरीरेति स्यात्"—इत्युक्तम्।

सत्वादेव अर्द्धं कायस्येत्यादिवाक्यसत्त्वेऽपि वाग्रहणं पाक्षिकषीष-ज्ञापनार्थम् । तेन व्यक्तच्छत्रानपूरणैरिति न षीषनिषेधः (१) ।

कालानां परिमाणिभिः (२) । कालवाचिनां परिमाणि-वाचिभिः सह षः स्यात् । मासो जातस्य मासजातः, द्व्यहो जातस्य द्व्यहजातः द्वे अह्नी जातस्य द्व्यह्नजातः (३) । यद्यपि द्रोणाढ़कादीनामेव परिमाणत्वं प्रसिद्धं, तथाप्यत्र कालस्य गौण-परिमाणत्वमवच्छेदहेतुत्वात् (४) । तथाहि मासो जातस्येत्यादौ मासादयो जातसम्बन्धिनीः सूर्य्यगतीर्गमयन्ति इत्यवच्छेदहेतव इति (५) ।

द्व्या प्राप्तापन्नयोः । अनयोर्द्व्यन्तेन सह षः स्यात् । प्राप्तो जीविकां प्राप्तजीविकः आपन्नजीविकः । जीविकाप्राप्तः जीविका-

---

(१) ननु भिक्षातुर्य्यमित्यादौ पूरणार्थकशब्दयोगेऽपि व्यक्तच्छत्रानपूरणैरित्य-नेन न कथं षष्ठीसमासनिषेध इत्यत आह अस्येत्यादि ।

(२) परिमीयते परिच्छिद्यते यैस्तानि परिमाणानि परिच्छेदकानि, तान्येषां सन्तीति परिमाणिनस्तैः ।

(३) "यस्य हि जननादूर्द्धं मासो गत स मासजात इति व्यवह्रियते । तत्र व्यवहारकालजननलक्षणयोरन्तरालभावी मासो जननद्वारा जातमपि परि-च्छिनत्त्येव"—इति प्रौढ़मनोरमा । "कालो जातस्य मासेन परिच्छिद्यते । तथाहि—कियान् कालोऽस्य जातस्येति प्रश्ने मास इत्यादि प्रतिवचनं, स च परिच्छिद्यमानस्त्रिंशद्रात्रात्मक एव संपद्यते" इति कैयटः । द्व्यह इति द्वयोरह्नोः समाहार इति वाक्ये द्विगुःसमासः, सख्यहोरात्र इत्यादिना षः ।

(४) कालस्य खण्डकालस्येत्यर्थः, अखण्डकालस्यानवधित्वेनावच्छेदहेतुत्वा-भावात् । अवच्छेदः अन्यूनातिरिक्तता इति विद्यालङ्कारः ।

(५) जातस्य सम्बन्धिनीर्जातद्रव्यानामनुभूयमानजननावधिका आदित्य-गतीर्बोधयन्तीति, आदित्यगतीनामन्यूनातिरिक्तत्वबोधहेतवो भवन्तीत्यर्थ इति विद्यालङ्कारः ।

पन्न इति आश्रितादित्वात्। प्राप्ता जीविकां या सा प्राप्तजीविका आपन्नजीविका इत्यत्र तत्वग्रहणज्ञापकात् पुंवद्भावः (१)। एवं द्वितीया भिक्षाया द्वितीयभिक्षा इत्यादावपि।

स्वयंसाम्योः क्तेन। स्वयं सामि इत्येतयोर्व्यसंज्ञयोः क्तान्तेन सह षः स्यात्। स्वयं धौतः तस्येदं स्वायंधौतं, (२) सामिकृतम्। सामिशब्दोऽर्द्धपर्य्यायः, तेन तदर्थस्य ग्रहणात् नेमिकृतम् अर्द्धकृतमित्यपि कश्चित्। कृदन्तग्रहणे कारकोपसर्गपूर्व्वस्यापि ग्रहणमिति न्यायात् स्वयंचिरविलीनः स्वयंधर्म्मगत इत्यादि (३)।

कुप्राद्योर्नित्यम्। कु इत्यस्य प्रादेश्च व्यसंज्ञकस्य स्याद्यन्तेन सह षः स्यान्नित्यम्। नित्यसे स्वपदविग्रहाभावात् पदान्तरेणार्थकथनम्। कुत्सितः पुरुषः कुपुरुषः, ईषज्जलं काजलं, प्रकृष्टः प्रगतः प्रपतितो वा पुरुषः प्रपुरुषः। विशिष्टो विरुद्धो वा पुरुषः विपुरुषः, दुष्टो जनः दुर्ज्जनः, शोभनो जनः सुजन इत्यादयः शिष्टप्रयोगानुसारेण ज्ञातव्याः।

क्रान्तादावत्यादिर्द्वग्रा। क्रान्तादावर्थे वर्त्तमानस्यात्यादेर्द्वग्रन्तेन

---

(१) प्राप्ता जीविका येन यया वेति बहुव्रीहिसमासाश्रयणेन चरितार्थत्वेऽपि प्राप्तप्रिय इत्यादौ पुंवद्भावो न स्यात्। प्राप्तराज इत्यादौ समासान्तप्रत्ययोऽपि न स्यादित्यतस्तत्पुरुषसमासाश्रयणमिति बोध्यम्—इति हृन्मुग्धबोधम्।

(२) समासैकपदत्वे सति फलं दर्शयति स्वायंधौतमिति।

(३) क्तेन केवलेन समासासम्भवात् तदन्तग्रहणं तावद्भवतु सोपसर्गेण कथं समासः? अत आह कृदन्तेत्यादि। कारकोपसर्गौ पूर्व्वौ यस्मात् स कारकोपसर्गपूर्व्वस्तस्य कारकोपसर्गपूर्व्वस्य कृदन्तस्येति शेषः। कारकोपसर्गाभ्यां सह समस्तोऽपि कृत् सर्व्वत्र कृद्ग्रहणेन गृह्यते इत्यर्थः। विशेषणसमासेन सिद्धे सामिशब्दस्यैव पूर्व्वनिपातार्थं सामिग्रहणमिति गोयीचन्द्रः।

सह नित्यं षः स्यात् । अतिक्रान्तो वेलामतिवेलः, उद्गतो श्रियां उच्छ्रियः (१) ।

क्रुष्टादाववादिस्त्या । क्रुष्टादावर्थे वर्त्तमानस्यावादेस्त्यन्तेन सह नित्यं षः स्यात् । अवक्रुष्टं कोकिलया अवकोकिलं वनम्, अवक्रुष्टः कोकिलेन अवकोकिलो वृक्षः सशब्दः कृत इत्यर्थः । सन्नद्धो वर्म्मणा संवर्म्मा, परिणद्धो वीरुद्भिः परिवीरुत्, सङ्गत-मगनेन समगनं, प्रतीतोऽक्ष्णा प्रत्यक्षो घटः, सुसङ्गतो वेलया सुवेलः, अधिगतोऽक्ष्णा अध्यक्षो घट इत्यादि ।

ग्लानादौ पर्य्यादिश्चया । ग्लानादावर्थे वर्त्तमानस्य पर्य्या-देश्चयन्तेन सह नित्यं षः स्यात् । परिग्लानोऽध्ययनाय पर्य्यध्ययनः, पर्य्याप्तं कुमार्य्यै अलंकुमारिः (२) । अलंशब्दस्य पाक्षिकः स इति कश्चित्, तन्मतेऽलं कुमार्य्यै इति वाक्यमपि । उद्युक्तो युद्धाय उद्युद्धः, अभिगतः श्रुतायाभिश्रुतः ।

क्रान्तादौ निरादिः ष्या । क्रान्तादावर्थे वर्त्तमानस्य निरादेः

---

(१) उभयत्र गवादेरिति ह्रस्वः । ननु अप्रधानस्य तेन ह्रस्वो विधीयते, उत्तरपदार्थप्रधानस्तत्पुरुषः । उच्यते—तस्य व्यभिचारो प्रागेव प्रतिपादितः । यो वेलामतिक्रान्तः स एवात्र प्रधानम् । यद्येवम् अतिवेल उच्छ्रिय इति बहु-व्रीहिणापि सिध्यति । अर्थभेदोऽपि नास्ति, किमनेन लक्षणेन ? नैवं; यदि बहुव्रीहिः स्यात्तदा अतिनदि अतिभर्त्ता इत्यादौ कादिर्ऋदादेः (सूत्रः कः) इति नित्यं कः स्यात्, अतिराज इत्यादौ टः (षः) न स्यात्, अतिवर्म्म इत्यत्र अन् (वर्म्मादन्) स्यात्, अतिजाय इत्यत्र जानिः स्यात्—इति गोयीचन्द्रः ।

(२) कुमार्य्यै कुमार्य्यर्थम् अलं समर्थः अलंकुमारिर्वरः, तादर्थ्ये चतुर्थीयम्—इति प्रयोगरत्नमालाटीका ।

*Nirukta, (2nd Edition) Vol. I. Fasc. 1 @ Rs. 1-4 ...	Rs. 1	4
*Nyāyavārtika, Fasc. 2--6 @ /10/ each	3	2
Nityācārapaddhatiḥ, Fasc. 1--7 @ /10/ each	4	6
Nityācārapradīpa Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-4 @ /10/ each ...	7	8
Nyāyabindutīkā, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. II, Fasc. 1--3 @ /10/ each ...	1	14
Nyaya Vartika Tatparya Parisudhi, Fasc. 1-2 @ /10/ each	1	4
Nyayasarah	2	0
Padumawati, Fasc. 1--6 @ 2/ each	10	0
Prākrita-Paingalam, Fasc. 1--7 @ /10/ each	4	6
Parāçara Smṛti, Vol. I, Fasc. 2-8; Vol. II, Fasc. 1--6 ; Vol. III, Fasc. 1--6 @ /10/ each	11	14
Parāçara, Institutes of (English) @ 1/- each	1	0
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each	3	12
Rasarnavam, Fasc. 1-3	3	12
Ravisiddhanta Manjari, Fasc. 1	0	10
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each	1	4
Samaraicca Kaha Fasc. 1-5, @ /10/ each	3	2
Sāṅkhya Sūtra Vṛtti, Fasc. 1--4 @ /10/ each	2	8
Ditto (English) Fasc. 1--3 @ 1/- each	3	0
Six Buddhist Nyaya Tracts.	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhikaumudī, Fasc. 1-4 @ /10/ each	2	8
Sundaranandam Kavyam	1	0
Suryya Siddhanta Fasc. 1-2 @ 1-4 each	2	8
Syainika Sastra	1	0
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each	9	6
*Taitterīya Saṁhitā, Fasc. 27--45 @ /10/ each	11	14
Tāṇḍya Brāhmaṇa, Fasc. 10--19 @ /10/ each	6	4
Tantra Vārteka (English) Fasc. 1-10 @ 1/4/ each	12	8
* Tattva Cintāmaṇi, Vol. I, Fasc. 1-9, Vol II, Fasc. 2-10, Vol. III, Fasc. 1--2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each	23	12
Tattva Cintamani Didhiti Vivriti, Vol. I, Fasc, 1-6; Vol. I', Fc, 1, @ /10/ each	4	6
Tattva Cintamani Didhiti Prakas, Fasc. 1-5, @ /10/ each	3	2
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each	1	14
Tirthacintamoni, Fasc, 1-3, @ /10/ each	1	14
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each ...	6	14
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each	6	0
Vallāla Carita, Fasc 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each	3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3--6 ; Vol. II, Fasc. 1--7, @ /10/ each ...	6	14
Vidhāna Pārijata, Fasc. 1--8 Vol. II. Fasc. I @ /10/ each	5	10
Ditto Vol. II, Fasc. 2-5 @ 1/4/	5	0
Vivādaratnākara, Fasc. 1--7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each	3	12
Yogasāstra Fasc. 1-3	3	12
Tibetan Series.		
Amarkosha	2	0
Baudhastotrasangraha, Vol. I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1--4 @ 1/- each	4	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag-Sam S'hi Ṭiñ, Fasc. 1--4 @ 1/- each	4	[illegible]
Rtogs brjod dpag hkhri S'iñ (Tib. & Sans. Avadāña Kalpalatā Vol. I, Fasc. 1--10 ; Vol. II. Fasc. 1--10 @ 1/- each	20	[illegible]
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc 1-[illegible] @ 1/- each	1[illegible]	[illegible]
Arabic and Persian Series.		
Āmal-i-Salih, or Shan Jahan Namah	[illegible]	[illegible]
Al-Muqaddasi (English) Vol. I, Fasc. 1--4 @ 1/- each	[illegible]	[illegible]
Āīn-i-Akbarī, Fasc. 1-22 @ 1/8/ each	[illegible]	[illegible]
Ditto (English) Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-5, Index to Vol. II, @ 2/- each	[illegible]	[illegible]
Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each...	[illegible]	[illegible]
Akbarnāmah, English Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-[illegible], Vol. III, Fasc. 1--2 @ 1/4/ each	[illegible]	
Arabic Bibliography, by Dr. A. Sprenger, @ /10/ ...		
Conquest of Syria, Fasc. 1-9 @ /10/ each ...		
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- ea[illegible]		

*The other Fasciculi of these works are out of stock [illegible]
be supplied.